नान्॥कौन्तेयान्मनुजेंद्राणांविस्मयःसमजायत।सपुत्राहिपुराकुंतीदग्धाजंतुगृहेश्रुता।पुनर्ज्जीताभि
वचतांतेऽमन्यन्तनराधिपाः।धिगऽकुर्वंस्तदाभीष्मंधृतराष्ट्रंचकौरवं।कर्म्मणातिनृशंसेनपुरोचनकृ
तेनवै।हत्तेस्वयंवरेचैवराजानःसर्वएवते।यथागतंविप्रजग्मुर्विदित्वापांडवान्वृतान्।~~कौन्तेयान्मनुजें~~
~~द्राणांविस्मयःसमजायत।सपुत्राहिपुराकुंती~~अथदुर्य्योधनोराजाविमनाभ्रातृभिःसह।अश्वत्थाम्ना
मातुलेनकर्णेनचकृपेणच।विनिवृत्तोवृतंदृष्ट्वाद्रौपद्याश्वेतवाहने।तंतुदुःशासनोव्रीडन्मंदंमंदमि
वाब्रवीत्।यद्यसौब्राह्मणोनस्याद्विंदेतद्रौपदींनसः।नहितंतत्वतोराजन्वेदकश्चिद्धनंजयं।दैवंचप
रंमन्येपौरुषंचाप्यनर्थकं।धिगस्तुपौरुषंतातधृयंतेयत्रपांडवाः।एवंसंभाषमाणास्तेनिंदंत
श्चपुरोचनं।विविशुर्हास्तिनपुरंदीनाविगतचेतसः।त्रस्ताविगतसंकल्पादृष्ट्वापार्थान्महौजसः।मुक्ता
न्हव्यभुजश्चैवसंयुक्तान्द्रुपदेनच।धृष्टद्युम्नंतुसंचिन्त्यतथैवचशिखंडिनं।द्रुपदस्यात्मजांश्चान्यान्स
र्वयुद्धविशारदान्।विदुरस्त्वथतांश्रुत्वाद्रौपद्यापांडवैर्वृतान्।व्रीडितान्धार्त्तराष्ट्रांश्चभग्नदर्प्पानुपाग
तान्।ततःप्रीतमनाराजन्धृतराष्ट्रंविशांपते।उवाचदिष्ट्याकुरवोवर्द्धन्तइतिविस्मितः।वैचित्रवीर्य्य

आ०प०
२८०

स्तुन्नृपोनिशाम्यविदुरस्यतत्।अब्रवीत्परमप्रीतोदिष्ट्यादिष्ट्येतिभारत।मन्यतेसवृतंपुत्रंज्येष्ठंद्रुपदक
न्यया।दुर्योधनमविज्ञानात्प्रज्ञाचक्षुर्नरेश्वरः।अथत्वाज्ञापयामासद्रौपद्याभूषणंवहु।आनीयतां
वैकृष्णेतिपुत्रंदुर्योधनंतदा।अथास्यपश्चाद्विदुरआचख्यौपांडवान्वृतान्।सर्वान्कुशलिनोवीरान्पू
जितान्द्रुपदेनह।तेषांसंवंधिनश्चान्यान्वहून्वलसमन्वितान्।समागतान्पांडवेयैस्तस्मिन्नेवस्वयंवरे
॥ धृतराष्ट्रउ ॥यथैवपांडोःपुत्रास्तेतथैवाभ्यधिकोमम।यथाचाभ्यधिकावुद्धिर्ममतान्प्रतितच्छृ
णु।यत्तेकुशलिनोवीरामित्रवन्तश्चपांडवाः।तेषांसंवंधिनश्चान्येवहवश्चमहावलाः।कोहिद्रुपदमासाद्य
मित्रंक्षत्तःसपांडवं।नवुभूषेद्भवेनार्थीगतश्रीरिवपार्थिवः॥ वैशं ॥तंतथाभाषमाणंतुविदुरःप्रत्य
भाषत।नित्यंभवतुतेवुद्धिरेषाराजंछतंसमाः।ततोदुर्योधनश्चापिराधेयश्चविशांपते।धृतराष्ट्रमुपाग २८०
म्यवचोब्रूतामिदंतदा।सन्निधौविदुरस्यत्वांदोषंवक्तुंनशक्नुवः।विविक्तमितिवक्ष्यावःकिंतवेदंचिकीर्षि
तं।सपत्नवृद्धिंयत्तातमन्यसेवृद्धिमात्मनः।अभिष्टौषिचयत्क्षत्तुःसमीपेद्विषतांवरं।अन्यस्मिन्नृपकर्त्त
मेत्वमन्यत्कुरुषेनघ।तेषांवलविघातोहिकर्त्तव्यस्तातनित्यशः।तेवयंप्राप्तकालस्यचिकीर्षांमंत्रयामहे।

यथानोनग्रसेयुस्तेसपुत्रवलवांधवान् — इत्यादिपर्वणि धृतराष्ट्र उ — अहमप्येवमेवैतच्चि
कीर्षामियथायुवां।विवेक्तुंनाहमिच्छामित्वाकारंविदुरंप्रति।ततस्तेषांगुणानेवकीर्तयामिविशेषतः।ना
ववुध्येतविदुरोममाभिप्रायमिंगितैः।यच्चत्वंमन्यसेप्राप्तंतद्ब्रवीहिसुयोधन।राधेयमन्यसेयच्चप्राप्त
कालंवदाशुमे॥ दुर्योधन उ ॥अद्यतत्कुशलैर्विप्रैःसुगुप्तैराप्तकारिभिः।कुंतीपुत्रान्भेदयामो
माद्रीपुत्रौचपांडवौ।अथवाद्रुपदोराजामहद्भिर्वित्तसंचयैः।पुत्राश्चास्यप्रलोभ्यन्ताममात्याश्चैवसर्वशः।
परित्यजेद्यथाराजाकुंतीपुत्रंयुधिष्ठिरं।अथतत्रैववातेषांनिवासंरोचयंतुभो।इहैषांदोषवद्वासंव
र्णयंतुपृथक्पृथक्।तेभिद्यमानास्तत्रैवमनःकुर्वन्तुपांडवाः।अथवाकुशलाःकेचिदुपायनिपुणानराः
इतरेतरतःपार्थान्भेदयंत्वनुरागतः।व्युत्थापयंतुवाकृष्णांवहुत्वात्सुकरंहितत्।अथवापांडवांस्तस्यां
भेदयंतुततश्चतां।भीमसेनस्यवाराजन्नुपायकुशलैर्नरैः।मृत्युर्विधीयतांछन्नैःसहितेषांवलाधिकः।
तमाश्रित्यहिकौन्तेयःपुराचास्मान्नमन्यते।सहितीक्ष्णश्चशूरश्चतेषांचैवपरायणं।तस्मिंस्त्वभिहतेरा
जन्हतोत्साहाहतौजसः।यतिष्यंतेनराज्यायसहितेषांव्यपाश्रयः।अजेयोह्यर्जुनःसंख्येपृष्ठगोपेवृको

दरो।तमृषेफाल्गुनोयुद्धेराधेयस्यनपादभाक्।तेजानानास्क्तदौर्बल्यंभीमसेनस्यतेनमहता।अस्माद्बलवतो
ज्ञात्वानयतिष्यन्तिदुर्बलाः।इहागतेषुवातेषुनिदेशवशवर्त्तिषु।प्रवर्त्तयिष्यामहेराजन्यथाशास्त्रंनिव
र्हणं।अथवादर्शनीयाभिःप्रमदाभिर्विलोभ्यतां।एकैकस्तत्रकौंतेयस्ततःकृष्णाविरज्यतां।प्रेष्यतांचैव
राधेयस्तेषामागमनायवै।तैस्तैःप्रकारैःसन्नीयपात्यन्तामाप्तकारिभिः।एतेषामप्युपायानांयस्तेनि
र्दोषमात्मनः।तस्यप्रयोगमातिष्ठपुराकालोतिवर्त्तते।यावद्ध्यकृतविश्वासाद्रुपदेपार्थिवर्षभे।तावदे
वहितेऽशक्यानशक्यास्तेततःपरं।एषाममममतिस्तातनिग्रहायप्रवर्त्तते।साध्वीवायदिवासाध्वीकिंवा
राधेयमन्यसे   इत्यादिपर्वणि   कर्णेन   दुर्योधनेनचप्रज्ञानसम्यगितिमेमतिः।नह्युपा
येनतेशक्याःपांडवाःकुरुवर्द्धन।पूर्वमेवहितेसूक्ष्मैरुपायैर्यतितास्त्वया।इहैववर्त्तमानास्तेसमीपेत २९१
वपार्थिव।अजातपक्षाःशिशवःशकितानैवबाधितुं।जातपक्षाविदेशस्थाविवृद्धाःसर्वतोद्यते।नोपा
यसाध्याःकौन्तेयाममैषामतिरच्युत।नचतेव्यसनैर्योक्तुंशक्यादिष्टकृतेनच।शंकिताश्चेप्सवश्चैवपि
तृपैतामहंपदं।परस्परेणभेदश्चनाधातुंतेषुशक्यते।एकस्यांयेरताःपत्न्यांनभिद्यन्तेपरस्परं।नचापि

कृष्णाशक्याततस्तेभ्योभेदयितुंपरैः।परिघूनाहृहनवतीकिमुताद्यमृजावतः।ईप्सितश्चगुणःस्त्रीणांएक
स्यावहुभर्तृता।तंचप्राप्तवतीकृष्णानसाभेदयितुंसुखा।आर्यवृतश्चपांचाल्योनसराजाधनप्रियः।नसं
त्यक्ष्यतिकौंतेयान्राज्यदानैरपिध्रुवं।तथास्यपुत्रोगुणवाननुरक्तश्चपांडवान्।तस्मान्नोपायसाध्यांस्ता
नहंमन्येकथंचन।इदंत्वद्यक्षमंकर्तुमस्माकंपुरुषर्षभ।यावन्नकृतमूलास्तेपांडवेयाविशांपते।तावत्प्र
हरणीयास्तेतत्तुभ्यंतातरोचतां।अस्मत्पक्षोमहान्यावत्यावत्पांचालकोलघुः।तावत्प्रहरणंतेषांक्रिय
तांमाविचारय।वाहनानिप्रभूतानिमित्राणिचकुलानिच।यावन्नतेषांगांधारेतावद्विक्रमपार्थिव।याव
च्चराजापांचाल्योनोद्यमेकुरुतेमनः।सहपुत्रैर्महावीर्यैस्तावद्विक्रमपार्थिव।यावन्नायातिवार्ष्णेयःक
र्षन्यादववाहिनीं।राज्यार्थेपांडवेयानांपांचाल्यसदनंप्रति।वसूनिविविधान्भोगान्राज्यमेवचकेवलं।ना
त्याज्यमस्तिकृष्णस्यपांडवार्थेकथंचन।विक्रमेणमहीप्राप्ताभरतेनमहात्मना।विक्रमेणचलोकांस्त्रीन्
जितवान्पाकशासनः।विक्रमंचप्रशंसंतिक्षत्रियस्यविशांपते।स्वकोहिधर्मःशूराणांविक्रमःपार्थिवर्ष
भ।तेवलेनवयंराजन्महताचतुरंगिणा।प्रमथ्यद्रुपदंशीघ्रमानयामेहपांडवान्।नहिसाम्नानदानेननभेदे

 नचपांडवाः शक्याः साधयितुंतस्माद्विक्रमेणैवतान्जहि।तान्विक्रमेणजित्वेमामखिलांभुंक्ष्वमेदिनीं।।
 अतोनान्यंप्रपश्यामिकार्य्योपायंजनाधिप वैशं श्रुत्वातुराधेयवचोधृतराष्ट्रःप्रतापवाञ्श
अभिपूज्यततःपश्चादिदंवचनमब्रवीत्।उपपन्नंमहाप्राज्ञेकृष्णास्त्रेसूतनंदन।त्वयिविक्रमसंपन्नमि
दंवचनमीदृशं।भूयएवतुभीष्मश्चद्रोणोविदुरएवच।युवांचकुरुतंबुद्धिंभवेद्यानःसुखोदया।त
तःआनाय्यतान्सर्वान्मंत्रिणःसुमहायशाः।धृतराष्ट्रोमहाराजमंत्रयामासवैतदा।। इत्यादिप
र्वणि भीष्मउ नरोचतेविग्रहोमेपांडुपुत्रैःकथंचन।यथैवधृतराष्ट्रोमेतथापांडरसंश
यं।गांधार्य्याश्चयथापुत्रास्तथाकुंतीसुतामम।यथाचममतेरक्षाधृतराष्ट्रतथातव।यथाचमम
राज्ञश्चतथादुर्य्योधनस्यते।तथाकुरूणांसर्वेषामन्येषामपिपार्थिव।एवंगतेविग्रहंतैर्नरोचेसंधा
यवीरैर्दीयतामर्द्धभूमिः।तेषामपीदप्रपितामहानांराज्यंपितुश्चैवकुरूत्तमानां।दुर्य्योधनयथारा
ज्यंत्वमिदंतातपश्यसि।ममपैतृकमित्येवंतेपिपश्यंतिपांडवाः।यदिराज्यंनतेप्राप्ताःपांडवेयाय
शस्विनः।कुतएवतवापीदंभारतस्यापिकस्यचित्।अथधर्मेणराज्यंत्वंप्राप्तवान्भरतर्षभ।तेपि

राज्यमनुप्राप्ताःपूर्वमेवेतिमेमतिः॥मधुरेणैवराज्यस्यतेषामर्द्धंप्रदीयतां।एतद्धिपुरुषव्याघ्रहितंस
र्वजनस्यच।अतोन्यथाचेत्क्रियतेनहितंनोभविष्यति।तवाप्यकीर्त्तिःशकलाभविष्यतिनसंशयः।
कीर्त्तिरक्षणमातिष्ठकीर्त्तिर्हिपरमंबलं।नष्टकीर्त्तेर्मनुष्यस्यजीवितंह्यफलंस्मृतं।यावत्कीर्त्तिर्म
नुष्यस्यनप्रणश्यतिकौरव।तावज्जीवतिगांधारेनष्टकीर्त्तिस्तुनश्यति।तमिमंसमुपातिष्ठधर्म्मं
कुरुकुलोचितं।अनुरूपंमहाबाहोपूर्वेषामात्मनःकुरु।दिष्ट्याध्रियन्तेपार्थाहिदिष्ट्याजीवतिसा
पृथा।दिष्ट्यापुरोचनःपापोनसकामोत्ययंगतः॥यदाप्रभृतिदग्धास्तेकुन्तिभोजसुतासुताः।तदा
प्रभृतिगांधारेनशक्नोम्यभिवीक्षितुं।लोकेप्राणभृतंकंश्चिश्रुत्वाकुंतींतथागतां।नचापिदोष
णतथा।लोकोमन्येसुरोचनं।यथात्वांपुरुषव्याघ्रलोकोदोषेणगच्छति।तदिदंजीवितंतेषांतव
किल्बिषनाशनं।संमन्तव्यंमहाराजपांडवानांचदर्शनं।नचापितेषांवीराणांजीवतांकुरुनंदन।पि
त्र्योंशःशक्यआदातुमपिवज्रभृतास्वयं।तेसर्वेवस्थिताःधर्म्मेसर्वेचैवैकचेतसः॥अधर्म्मेणनिर
स्ताश्चतुल्येराज्येविशेषतः॥यदिधर्म्मस्त्वयाकार्य्योयदिकार्य्यंप्रियंचमे।क्षेमंचयदिकर्त्तव्यंतेषाम

आ०प०
२९३

र्द्धंप्रदीयतां इत्यादिपर्व्वणि द्रोणेन मंत्रायसमुपानीतैर्द्धार्तराष्ट्रहितैर्नृप। धर्म्यमर्थ्यं
यशस्यंचवाच्यमित्यनुशुश्रुम। ममाप्येषामतिस्तातयाभीष्मस्यमहात्मनः। संविभज्यास्तुकौंते
याधर्म्मएषसनातनः। प्रेष्यतांद्रुपदायाशुनरःकश्चित्प्रियंवदः। बहुलंरत्नमादायतेषामर्थाय
भारत। मिथःकृत्यंचतस्मैसआदायवसुगच्छतु। वृद्धिंचपरमांब्रूयात्त्वत्संयोगोद्भवांतथा। संप्रीय
माणंत्वांब्रूयाद्राजन्दुर्योधनंतथा। असकृद्द्रुपदेचैवधृष्टद्युम्नेचभारत। उचितत्वंचयोगस्यप्रिय
त्वंचापिवर्णयेत्। पुनःपुनश्चकौंतेयान्माद्रीपुत्रौचसांत्वयन्। हिरण्मयानिशुभ्राणिबहून्याभ
रणानिच। वचनात्तवराजेंद्रद्रौपद्याःसंप्रयच्छतु। तथाद्रुपदपुत्राणांसर्वेषांभरतर्षभ। पांडवानां
चसर्वेषांकुन्त्यायुक्तानियानिच। एवंसांत्वसमायुक्तंद्रुपदंपांडवैःसह। उक्त्वाथानन्तरंब्रूयात्तेषा २९३
मागमनंप्रति। अनुज्ञातेषुवीरेषुबलंगच्छतुशोभनं। दुःशासनोविकर्णश्चाप्यानेतुंपांडवानिह।
ततस्तेपांडवाःश्रेष्ठाःपूज्यमानाःसदात्वया। प्रकृतीनामनुमतेपदेस्थास्यंतिपैतृके। एतत्तवम
हाराजपुत्रेषुतेषुचैवहि। वृत्तमौपयिकंमन्येभीष्मेणसहभारत कर्णेन योजितामा

नाम्यांसर्वकार्य्येषु नन्तरौ नमंत्रयेतांलब्धेयः किमद्भुततरंततः। दुष्टेन मनसा यो वै प्रच्छन्नेनान्तरा
त्मना। ब्रूयान्निश्रेयसंनाम कथंकुर्य्यात्सतांमतं। नमित्राण्यपथंकुर्वन्तु श्रेयसेवेन राघवा। विधि
पूर्वं हि सर्वस्य दुःखंवा यदिवासुखं। कृतप्रज्ञोकृतप्रज्ञोवालोके दृश्यमानवः। स सहायोऽसहा
यश्च सर्वंसर्वत्रविंदति। श्रूयते हि पुराकश्चिद्दंडुवीवहतीश्वरः। आसीद्राजगृहे राजामागधानाम
हीक्षितां। स हीनः करणैः सर्वैः उच्छ्रासपरमो नृपः। अमात्यसंस्थः सर्वेषु कार्य्येष्वेवाभवत्तदा। त
स्यामात्यो महाकर्णिर्वभूवैकेश्वरस्तदा। स लब्धावलमात्मानं मन्यमानोऽवमन्यते। स राज्ञ उपभो
ग्यानि स्त्रियो रत्नधनानि च। आददे सर्वशो मूढ ऐश्वर्य्यं च स्वयं तदा। तदादाय च लुब्धस्य लाभाल्लो
भोप्यवर्द्धत। तथा हि सर्वमादाय राज्यमस्याजिहीर्षति। हीनस्य करणैः सर्वैरुच्छ्रासपरमस्य चाय
नमानोपि तद्राज्यं न शशाकेति नः श्रुतं। किमन्यद्विहितान्नूनं तस्य सा पुरुषेंद्रता। यदि ते विहितं राज्यं
भविष्यति विशांपते। मिषतः सर्वलोकस्य स्थास्यते त्वयि तद्ध्रुवं। अतोन्यथा चेद्विहितं यतमानो न
लप्स्यते। एवं विद्धनुपादत्स्व मंत्रिणां साध्वसाधुतां। दुष्टानां चैव वोद्धव्यमदुष्टानां च भाषितां॥ ॥

द्रोणेन विमतेभावदोषेणयदर्थमिदमुच्यते। दुष्टंपांडवहेतोस्त्वंदोषमाख्यापयस्युत। हितंतु
आ०प० परमंकर्णब्रवीमिकुलवर्द्धन। अथत्वंमन्यसेदुष्टंब्रूहियत्परमंहितं। अतोन्यथायक्रियतेनब्रवीमिप
२८४ रंहितं। कुरवोवैविनंक्ष्यंतिनचिरेणैवमेमतिः इत्यादिपर्वणि विदुरउ राजन्निःसंश
यंश्रेयोवाच्यस्त्वमसिबांधवैः। नत्वशुश्रूषमाणेवैवाक्यंसंप्रतितिष्ठति। प्रियंहितंचतद्वाक्यंउक्तवान्
कुरुसत्तमः। भीष्मःशांतनवोराजन्प्रतिगृह्णासितन्नच। तथाद्रोणेनबहुधाभाषितंहितमुत्तमं। तच्च
राधासुतःकर्णोमन्यतेनहितंतच्चाचिंतयंश्चनपश्यामिराजंस्तवसुहृत्तमं। आभ्यांपुरुषसिंहाभ्यां
योवास्यात्प्रज्ञयाधिकः। इमौहिवृद्धौवयसाप्रज्ञयाचश्रुतेनच। समौचात्वयिराजेंद्रतथापांडुसुतेषुच।
धर्मेचानवरौराजन्सत्यतायांचभारत। रामाद्दाशरथेश्चैवगयाच्चैवनसंशयः। नचोक्तवंतावश्रेयःपुरस्ता २८४
दपिकिंचन। नचाप्यपकृतंकिंचिदनयोर्लक्ष्यतेत्वयि। ताविमौपुरुषव्याघ्रावनागसिनृपत्वयि। नमंत्र
येतांत्वच्छ्रेयःकथंसत्यपराक्रमौ। प्रज्ञावंतौनरश्रेष्ठावस्मिन्नृलोकेनराधिप। त्वन्निमित्तमतोनेमौकिंचि
ज्जिह्मंवदिष्यतः। इतिमेनैष्ठिकीबुद्धिर्वर्ततेकुरुनंदन। नचार्थहेतोर्धर्मज्ञौवक्ष्यतःपक्षसंश्रितं। एतद्धि

परमंश्रेयोमन्येहंतवभारत।दुर्य्योधनप्रभृतयःपुत्राराजन्यथातव।तथैवपांडवेयास्तेपुत्राराजन्नसं
शयः। तेषुचेदहितंकिंचिन्मंत्रयेयुरतद्विदः।मंत्रिणस्तेनचश्रेयःप्रपश्यन्तिविशेषतः।अथनेहद
ध्यैराजन्विशेषःस्वेषुवर्त्तते।अन्तरस्थंविवृण्वानाःश्रेयःकर्य्युर्न्नतेध्रुवं।एतदर्थमिमौराजन्महात्मा
नौमहाद्युती।नोचक्रुर्विहितंकिंचिन्नत्वेषतवनिश्चयः।यद्वाप्यशक्यंनांतेषामाहर्तुःपुरुषर्षभौ।तत्त
थापुरुषव्याघ्रतवतद्वद्दमस्तुते।कथंहिपांडवःश्रीमान्सव्यसाचीधनंजयः।शक्योविजेतुंसंग्रामेरा
जन्मघवतापिहि।भीमसेनोमहाबाहुर्न्नागायुतबलोमहान्।कथंस्मयुधिशक्येतविजेतुममरैरपि।
तथैवकृतिनौयुद्धेयमौयमसुताविव।कथंविजेतुंशक्यौतौरणेजीवितुमिच्छता।यस्मिन्धृतिरनु
क्रोशःक्षमासत्यंपराक्रमः।नित्यानिपांडवेज्येष्ठेसजीयेतरणेकथं।येषांपक्षधरोरामोयेषांमंत्रीज
नार्द्दनः।किन्नुतैरजितंसंख्येयेषांपक्षेचसात्यकिः।द्रुपदःश्वसुरोयेषांयेषांश्यालाश्चपार्षताः।धृष्ट
द्युम्नमुखावीराभ्रातरोद्रुपदात्मजाः।सोशक्यतांचविज्ञायतेषामग्रेचभारत।दायाद्यतांचधर्म्मेणसम्य
क्तेषुसमाचर।इदंनिर्द्दिष्टमयशःपुरोचनकृतंमहत्।तेषामनुग्रहेणाद्यराजन्प्रक्षालयात्मनः।तेषाम

आ०प०
२९५

नुग्रहश्चायंसर्वेषांचैवनःकुले।जीवितंचपरंश्रेयःक्षत्रस्यचविवर्द्धनं।द्रुपदोपिमहान्राजाकृतवैर
श्चनःपुरा।तस्यसंग्रहणंराजन्स्वपक्षस्यविवर्द्धनं।बलवन्तश्चदाशार्हाबहवश्चविशांपते।यतःकृष्णस्त
तःसर्वेयतःकृष्णस्ततोजयः।यच्चसाम्नैवशक्येतकार्यंसाधयितुंनृप।कोदैवशप्तस्तत्कार्यंविग्रहेण
समाचरेत्।श्रुत्वाचजीवतःपार्थान्पौरजानपदाजनाः।बलवद्दर्शनेहृष्टास्तेषांराजन्प्रियंकुरु।दुर्यो
धनश्चकर्णश्चशकुनिश्चापिसौबलः।अधर्मयुक्तादुष्प्रज्ञाबालामैषांवचःकृथाः।उक्तमेतत्पुराराज
न्मयागुणवतस्तव।दुर्योधनापराधेनप्रजेयंवैविनंक्ष्यति इत्यादिपर्वणि धृतराष्ट्र उ ॥
भीष्मःशान्तनवोविद्वान्द्रोणश्चभगवानृषिः।हितंचपरमंवाक्यंत्वंचसत्यंब्रवीषिमां।यथैवपांडवावी
राःकुन्तीपुत्रामहारथाः।तथैवधर्मतःसर्वेममपुत्रानसंशयः।यथैवममपुत्राणामिदंराज्यंविधीय २९५
ते।तथैवपांडुपुत्राणामिदंराज्यंनसंशयः।क्षत्तरानयगच्छैतान्सहमात्रासुसत्कृतान्।तयाचदेवरूपि
ण्याकृष्णयासहभारत।दिष्ट्याजीवंतितेपार्थादिष्ट्याजीवतिसापृथा।दिष्ट्याद्रुपदकन्यांचलब्धवन्तो
महारथाः।दिष्ट्यावर्द्धामहेसर्वेदिष्ट्याशान्तःपुरोचनः।दिष्ट्याममपरंदुःखमपनीतंमहाद्युते ॥

वैशं ततोजगामविदुरोधृतराष्ट्रस्यशासनात्।सकाशंयज्ञसेनस्यपांडवानांचभारत।समुपादाय
रत्नानिवसूनिविविधानिच।द्रौपद्याःपांडवानांचयज्ञसेनस्यचैवह।तत्रगत्वासधर्म्मज्ञःसर्वशास्त्रविशा
रदः।द्रुपदंन्यायतोराजन्संयुक्तमुपतस्थिवान्।सचापिप्रतिजग्राहधर्म्मेणविदुरंततः।चक्रतुश्चयथान्या
यंकुशलप्रश्नसंविदं।ददर्शपांडवांस्तत्रवासुदेवंचभारत।स्नेहात्परिष्वज्यसतान्पप्रछानामयंततः।तैश्चा
प्यममवुद्धिःसपूजितोहियथाक्रमं।वचनाद्धृतराष्ट्रस्यस्नेहयुक्तंपुनःपुनः।पप्रछानामयंराजंस्ततस्ता
न्पांडुनंदनान्।प्रददौचापिरत्नानिविविधानिवसूनिच।पांडवानांचकुंत्याश्चद्रौपद्याश्चविशांपते।द्रुपदस्यच
पुत्राणांयथादत्तानिकौरवैः।प्रोवाचचामितमतिःप्रश्रितंविनयान्वितः।द्रुपदंपांडुपुत्राणांसन्निधौकेशवस
च विदुरउ राजञ्छृणुसहामात्यःसपुत्रश्चवचोमम।धृतराष्ट्रस्सपुत्रस्त्वांसहामात्यःसवांधवः।
अब्रवीत्कुशलंराजन्प्रीयमाणःपुनःपुनः।प्रीतिमांस्तेदृढंचापिसंवंधेननराधिपतथाभीष्मःशांतनवःकौ
रवैःसहसर्वशः।कुशलंत्वांमहाप्राज्ञःसर्वतःपरिपृछति।भारद्वाजोमहेष्वासोद्रोणःप्रियसखस्तव।समा
श्लेषमुपेत्यत्वांकुशलंपरिपृछति।धृतराष्ट्रश्चपांचाल्यस्त्वयासंवंधमीयिवान्।कृतार्थंमन्यतेत्मानंतथास

आ०प० र्वैपिकौरवाः।नतथाराज्यसंप्राप्तिस्तेषांप्रीतिकरीमता।यथासंवधकंप्राप्ययज्ञसेनत्वयासह।एतद्विदित्वा
२९६ तुभवान्प्रस्थापयतुपांडवान्।द्रष्टुंहिपांडुपुत्रांश्चत्वरन्तिकुरवोभृशं।विप्रोषितादीर्घकालमेतेचापिनरर्ष
भाः।उत्सुकानगरंद्रष्टुंभविष्यन्तितथापृथा।कृष्णामपिचपांचालींसर्वाःकुरुवरस्त्रियः।द्रष्टुकामाःप्रतीक्षं
तेपुरंचविषयाश्चनः।सभवान्पांडुपुत्राणामाज्ञापयतुमाचिरं।गमनंसहदाराणामेतदत्रमतंमम।निसृष्टे
षुत्वयाराजन्पांडवेषुमहात्मसु।ततोहंप्रेषयिष्यामिधृतराष्ट्रस्यशीघ्रगान्।आगमिष्यंतिकौन्तेयाःकुन्ती
चसहकृष्णया इत्यादिपर्वणि द्रुपदउ एवमेतन्महाप्राज्ञयथात्थविदुराद्यमां।ममापिपर
मोहर्षःसंबंधेस्मिन्कृतेप्रभो।गमनंचापियुक्तंस्याद्दृढमेषांमहात्मनां।नतुतावन्मयायुक्तमेतद्वक्तुंस्वयं
गिरा।यदातुमन्यतेवीरःकुन्तीपुत्रोयुधिष्ठिरः।भीमसेनार्जुनौचैवयमौचपुरुषर्षभौ।रामकृष्णौचधर्म २९६
ज्ञौतदागच्छंतुपांडवाः।एतौहिपुरुषव्याघ्रावेषांप्रियहितेरतौ युधिष्ठिरउ परवन्तोवयंराजंस्त्व
यिसर्वेसहानुगाः।यथावक्ष्यसिनःप्रीत्यातत्करिष्यामहेवयं वैशं ततोब्रवीद्वासुदेवोगमनंरोच
तेमम।यथावामन्यतेराजाद्रुपदःसर्वधर्मवित् द्रुपदउ यथैवमन्यतेवीरोदाशार्हःपुरुषोत्तमः।

प्राप्तकालंमहाबाहुःसाबुद्धिर्न्निश्चितामममायथैवहिमहाभागाःकौन्तेयाममसांप्रतं।तथैववासुदे
वस्यपांडुपुत्रानसंशयः।नतच्छायतिकौन्तेयःपांडुपुत्रोयुधिष्ठिरः।यथैषांपुरुषव्याघ्रःश्रेयोध्याय
तिकेशवः॥ वैशं ॥ततस्तेसमनुज्ञाताद्रुपदेनमहात्मना।पांडवाश्चैवकृष्णश्चविदुरश्चमहीपते
आदायद्रौपदींकृष्णांकुन्तींचैवयशस्विनीं।सविहारंसुखंजग्मुर्न्नगरंनागसाह्वयं।श्रुत्वाचाप्यागता
न्वीरान्धृतराष्ट्रोजनेश्वरः।प्रतिग्रहायपांडूनांप्रेषयामासकौरवान्।विकर्णंचमहेष्वासंचित्रसेनंचभा
रत।द्रोणंचपरमेष्वासंगौतमंकृपमेवच।तैस्तेपरिवृतावीराःशोभमानामहाबलाः।नगरंहास्तिनपुरं
शनैःप्रविविशुस्तदा।कौतूहलेननगरंदीप्यमानमिवाभवत्।तत्रतेपुरुषव्याघ्राःशोकदुःखविनाश
नाः।ततउच्चावचावाचःपौरैःप्रियचिकीर्षुभिः।उदीरिताअशृण्वंस्तेपांडवाहृदयंगमाः।अयंसपुरुष
व्याघ्रःपुनरायातिधर्म्मवित्।योनःस्वानिवदायानधर्म्मेणपरिरक्षति।अद्यपांडुर्म्महाराजोवनादिवजन
प्रियः।आगतःप्रियमस्माकंचिकीर्षुर्न्नात्रसंशयः।किंतुनाद्यकृतंतानसर्वेषांनःपरंप्रियं।यन्नकुन्तीसु
तावीरानगरंपुनरागताः।यदिदत्तंयदिहुतंविद्यतेयदिनस्तपः।तेनतिष्ठंतुनगरेपांडवाःशरदांशतं।

आ०प०
२८७

ततस्ते धृतराष्ट्रस्य भीष्मस्य च महात्मनः। अन्येषां च तदार्हाणां चक्रुः पादाभिवंदनं। कृत्वा तु कुशलप्रश्नं
सर्वेणा नगरेण च। न्यविशंताथ वेश्मानि धृतराष्ट्रस्य शासनात्। विश्रांतास्ते महात्मानः कंचित्कालं महा
बलाः। आहूता धृतराष्ट्रेण राज्ञा शांतनवेन च धृतराष्ट्र उ भ्रातृभिः सह कौंतेय निबोध गदतो मम
पुनर्नो विग्रहो मा भूत् खांडवप्रस्थमाविश। न च वो वसतस्तत्र कश्चिच्छक्तः प्रबाधितुं। संरक्ष्यमाणान्पार्थेन
त्रिदशानिव वज्रिणा। अर्द्धं राज्यस्य संप्राप्य खांडवप्रस्थमाविश वैशं प्रतिगृह्य तु तद्वाक्यं नृप
सर्वे प्रणम्य तं। प्रतस्थिरे ततो घोरं वनं तन्मनुजर्षभाः। अर्द्धं राष्ट्रस्य संप्राप्य खांडवप्रस्थमाविशन्। तत
स्ते पांडवास्तत्र गत्वा कृष्णपुरोगमाः। मंडयांचक्रिरे तद्वै पुरं स्वर्गवदच्युताः। ततः पुण्ये शिवे देशे शांतिं कृत्वा
महारथाः। नगरं मापयामासुर्द्वैपायनपुरोगमाः। सागरप्रतिरूपाभिः परिखाभिरलंकृतं। प्राकारेण च। २८७
संपन्नं दिवमावृत्य तिष्ठता। पांडुराभ्रप्रकाशेन हिमराशिनिभेन च। शुशुभे तत्पुरश्रेष्ठं नागैर्भोगवतीय
था। द्विपक्षगरुडप्रख्यैर्द्वारैः शोधैश्च शोभितं। गुप्तमभ्रचयप्रख्यैर्गोपुरैर्मंदरोपमैः। विविधैरतिनिर्विद्धैः
शस्त्रोपेतैः सुसंवृतैः। शक्तिभिश्चावृतं तद्धि द्विजिह्वैरिव पन्नगैः। तल्पैश्चाभ्यासिकैर्युक्तं शुशुभे योधरक्षि

तं। तीक्ष्णांकुशशतघ्नीभिर्यंत्रजालैश्च शोभितां। आयसैश्च महाचक्रैः शुशुभे तत्सुरोत्तमं। सुविभक्तमहा
रथ्यं देवताबाधवर्ज्जितं। विरोचमानं विविधैः पांडुरैर्भवनोत्तमैः। तत्त्रिविष्टपसंकाशमिंद्रप्रस्थं व्यरो
चत। मेघवृंदमिवाकाशे विद्धं विद्युत्समावृतं। तत्र रम्ये शिवे देशे कौरव्यस्य निवेशनं। शुशुभे धनसंपू
र्णं धनाध्यक्षक्षयोपमं। तत्रागच्छन्द्विजा राजन्सर्ववेदविदां वराः। निवासं रोचयंति स्म सर्वभाषाविदस्त
था। वणिजश्चाययुस्तत्र नानादिग्भ्यो धनार्थिनः। सर्वशिल्पविदश्चैव वासायाभ्यागमंस्तदा। उद्यानानि च
रम्याणि नगरस्य समंततः। आम्रैराम्रातकैर्नीपैरशोकैश्चंपकैस्तथा। पुन्नागैर्नागपुष्पैश्च लकुचैः पन
सैस्तथा। शालतालतमालैश्च वकुलैश्च सकेतकैः। मनोहरैः सुपुष्पैश्च फलभारावनामितैः। प्राचीनाम
लकैर्लोध्रैरंकोलैश्च सुपुष्पितैः। जंबुभिः पाटलाभिश्च कुब्जकैरतिमुक्तकैः। करवीरैः पारिजातैरन्यैश्च विवि
धैर्द्रुमैः। नित्यपुष्पफलोपेतैर्नानाद्विजगणायुतैः। मत्तवर्हिणसंघुष्टं कोकिलैश्च सदामदैः। गृहैरादर्शविम
लैर्विविधैश्च लतागृहैः। मनोहरैश्चित्रगृहैस्तथा जगतिपर्वतैः। वापीभिर्विविधाभिश्च पूर्णाभिः परमांभ
सा। सरोभिरतिरम्यैश्च पद्मोत्पलसुगंधिभिः। हंसकारंडवयुतैश्चक्रवाकोपशोभितैः। रम्याश्च विविधा

स्तत्रपुष्करिण्योवनावृताः।तडागानिचरम्याणिबृहंतिसुबहूनिच।तेषांपुण्यजनोपेतंराष्ट्रमाविशतांमहत्
पांडवानांमहाराजशश्वत्प्रीतिरवर्द्धत।तत्रभीष्मेणराज्ञाचधर्मप्रणयनेकृते।पांडवाःसमपद्यन्तखांड
वप्रस्थवासिनः।पंचभिस्तैर्महेष्वासैरिंद्रकल्पैःसमन्वितं।शुशुभेतत्सुरश्रेष्ठंनागैर्भोगवतीयथा।तांनि
वेश्यततोवीरोरामेणसहकेशवः।ययौद्वारवतींराजन्पांडवानुमतेतदा इत्यादिपर्वणि जन
मेजयउ एवंसंप्राप्यराज्यंतदिंद्रप्रस्थेतपोधन।अतऊर्द्धंमहात्मानःकिमकुर्वतपांडवाः।सर्वएवम
हासत्वाममपूर्वपितामहाः।द्रौपदीधर्मपत्नीचकथंताननुवर्त्तत।कथंचपंचकृष्णायामेकस्यांते
नराधिपाः।वर्त्तमानामहाभागानभिद्यन्तपरस्परं।श्रोतुमिच्छाम्यहंसर्वंविस्तरेणतपोधन।तेषांचेष्टि
तमन्योन्यंयुक्तानांकृष्णयासह वैशंप धृतराष्ट्राभ्यनुज्ञाताःकृष्णयासहपांडवाः।रेमिरेखां २९८
डवप्रस्थेप्राप्तराज्याःपरंतपाः।प्राप्यराज्यंमहातेजाःसत्यसंधोयुधिष्ठिरः।पालयामासधर्मेणपृथिवीं
भ्रातृभिःसह।जितारयोमहाप्राज्ञाःसत्यधर्मपरायणाः।मुदंपरमिकांप्राप्तास्तत्रोषुःपांडुनंदनाः।कुर्वा
णाःपौरकार्याणिसर्वाणिपुरुषर्षभाः।आसांचक्रुर्महार्हेषुपार्थिवेष्वासनेषुच।नारदस्त्वथदेवर्षि

राजगामयदृच्छया। आसनंरुचिरंतस्मैप्रददौस्वंयुधिष्ठिरः। देवर्षेरुपविष्टस्यस्वयमर्घ्यंयथाविधि। प्रा
दाद्युधिष्ठिरोधीमान्राज्यंतस्मैन्यवेदयत्। प्रतिगृह्यतुतांपूजांऋषिःप्रीतमनास्तदा। आशीर्भिर्वर्द्धयित्वा
चतमुवाचास्यतामिति। निषसादाभ्यनुज्ञातस्ततोराजायुधिष्ठिरः। कथयामासकृष्णायैभगवंतमुपस्थि
तं। श्रुत्वैतद्द्रौपदीचापिशुचिर्भूत्वासमाहिता। जगामतत्रयत्रास्तेनारदःपांडवैःसह। तस्याभिवाद्यचरणौ
देवर्षेर्धर्मचारिणी। कृतांजलिःसुसंवीतास्थिताथद्रुपदात्मजा। तस्याश्चापिसधर्मात्मासत्यवागृषि
सत्तमः। आशिषोविविधाःप्रोच्यराजपुत्र्यास्तुनारदः। गम्यतामितिहोवाचभगवांस्तामनिंदितां। गताया
मथकृष्णायांयुधिष्ठिरपुरोगमान्। विविक्तेपांडवान्सर्वानुवाचभगवानृषिः॥ नारद उ॥ पांचाली
भवतामेकाधर्मपत्नीयशस्विनी। यथावोनात्रभेदःस्यात्तथानीतिर्विधीयतां। सुंदोपसुंदौहिपुराभ्रा
तरौसहितावुभौ। आस्तामवध्यावन्येषांत्रिषुलोकेषुविश्रुतौ। एकराज्यावेकगृहावेकशय्यासनाश
नौ। तिलोत्तमायास्तौहेतोरन्योन्यमभिजघ्नतुः। रक्ष्यतांसौहृदंतस्मादन्योन्यप्रीतिभावकं। यथावोनात्र
भेदःस्यात्तत्कुरुष्वयुधिष्ठिर युधिष्ठिर उ सुंदोपसुंदावसुरौकस्यपुत्रौमहामुने। उत्पन्नश्चक

थंभेदःकथंवान्योन्यमघ्नतां।अप्सरादेवकन्यावैकस्यचैषातिलोत्तमा।यस्याःकामेनसंमत्तौजघ्नतु
आ०प० स्तौपरस्परं।एतत्सर्वंयथावृत्तंविस्तरेणतपोधन।श्रोतुमिच्छामहेब्रह्मन्परंकौतूहलंहिनः ६
२९८ स्यादिपर्वणि नारदउ शृणुमेविस्तरेणेममितिहासंपुरातनं।भ्रातृभिःसहितःपार्थयथावृत्तंयु
धिष्ठिरः।महासुरस्यान्ववायेहिरण्यकशिपोःपुरा।निकुंभोनामदैत्येंद्रस्तेजस्वीबलवानभूत्।तस्यपुत्रौम
हावीर्यौजातौभीमपराक्रमौ।सुंदोपसुंदौदैत्येंद्रौदारुणौक्रूरमानसौ।तावेकनिश्चयौदैत्यावेककार्या
र्थसंमतौ।निरंतरमवर्त्तेतांसमदुःखसुखावुभौ।विनान्योन्यंनभुंजातेविनान्योन्यंनजल्पतुः।अन्यो
न्यस्यप्रियकरावन्योन्यस्यप्रियंवदौ।एकशीलसमाचारौद्विधैवैकोभवत्कृतः।तौविवृद्धौमहावी
र्यौकार्येष्वप्येकनिश्चयौ।त्रैलोक्यविजयार्थायसमाधायैकनिश्चयं।दीक्षांकृत्वागतौविंध्यंतावुग्रंते २९८
पतुस्तपः।तौतुदीर्घेणकालेनतपोयुक्तौबभूवतुः।क्षुत्पिपासापरिश्रांतौजटावल्कलधारिणौ।मलोप
चितसर्वांगौवायुभक्षौबभूवतुः।आत्मामांसानिजुह्वन्तौपादांगुष्ठाग्रधिष्ठितौ।ऊर्द्धवाहूचानिमिषौ
दीर्घकालंधृतव्रतौ।तयोस्तपःप्रभावेनदीर्घकालंप्रतापितः।धूमंप्रमुमुचेविंध्यस्तदद्भुतमिवाभव

त्रू।ततोदेवाभयंचक्रुरुग्रंदृष्ट्वातपोबलं।तयोर्विघ्नार्थमथोदेवाविघ्नानिचक्रिरे।रत्नैःप्रलोभया
मासुःस्त्रीभिश्चोभौपुनःपुनः।नचतौचक्रतुर्भंगंव्रतस्यसुमहाव्रतौ।अथमायांपुनर्देवास्तयोश्चक्रु
र्महात्मनोः।भगिन्योमातरोभार्यास्तयोश्चात्मजनस्तथा।प्रपात्यमानाविस्रस्ताःशूलहस्तेनरक्ष
सा।भ्रष्टाभरणकेशान्ताभ्रष्टाभरणवाससः।अभिभाष्यततःसर्वास्तौत्राहीतिविचुक्रुशुः।नचतौचक्रतु
र्भंगंव्रतस्यसुमहाव्रतौ।यदाक्षोभंनोपयातिनार्तिमन्यतरस्तयोः।ततःस्त्रियस्ताभूतंचसर्वमन्तरधी
यत।ततःपितामहःसाक्षादभिगम्यमहासुरौ।वरेणछादयामाससर्वलोकहितःप्रभुः।ततःसुंदोपसुं
दौतौभ्रातरौदृढमुत्तमौ।दृष्ट्वापितामहंदेवंतस्थतुःप्रांजलीतदा।ऊचतुश्चप्रभुंदेवंततस्तौसहितौत
दा।आवयोस्तपसानेनयदिप्रीतःपितामहः।मायाविदावस्त्रविदौबलिनौकामरूपिणौ।उभावप्यमरौस्या
वप्रसन्नोयदिनौप्रभुः॥ ब्रह्मोवाच ॥ऋतेमरत्वंयुवयोःसर्वमुक्तंभविष्यति।अन्यद्वृणीतंमृत्योश्चवि
धानममरैःसह।प्रभविष्यावइतियन्महदभ्युद्यतंतपः।युवयोर्हेतुनानेननामरत्वंविधीयते।त्रैलोक्यवि
जयार्थायभवद्भ्यामास्थितंतपः।हेतुनानेनदैत्येन्द्रौनवांकामंकरोम्यहं सुंदोपसुंदावूचतुः ॥

श्रा०प० त्रिषुलोकेषु यद्भूतं किंचित्स्थावरजंगमं। सर्वस्मान्नौ भयं न स्यादृते ऽन्योन्यं पितामह पितामह उ
३०० यत्प्रार्थितं यथोक्तं च काममेतद्ददानि वां। मृत्योर्विधानमेतत्तु यथावद्वो भविष्यति नारद उ ततः पिता
महो दत्वा वरमेतत्तदा तयोः। निवर्त्य तपसस्तौ च ब्रह्मलोकं जगाम ह। लब्ध्वा वराणि दैत्येंद्रावथ तौ भ्रातरा
वुभौ। अवध्यौ सर्वलोकस्य स्वमेव भवनं गतौ। तौ तु लब्धवरौ दृष्ट्वा कृतकामौ मनस्विनौ। सर्वः सुहृज्जनस्ता
भ्यां प्रहर्षमुपजग्मिवान्। ततस्तौ तु जटा भित्वा मौलिनौ संबभूवतुः। महार्हाभरणोपेतौ विरजोंबरधारिणौ
।अकालकौमुदीं चैव चक्रतुः सर्वकामिकां। नित्यः प्रमुदितः सर्वस्तयोश्चैव सुहृज्जनः। भक्ष्यतां भुज्यतां नि
त्यं दीयतां रम्यतामिति। गीयतां पीयतां चेति शब्दश्चासीद्गृहे गृहे। तत्र तत्र महानादैरुत्कृष्टतलनादितैः।
हृष्टं प्रमुदितं सर्वं दैत्यानामभवत्पुरं। तैस्तैर्विहारैर्बहुभिर्दैत्यानां कामरूपिणां। समाः संक्रीडतां तेषामह ३००
रेकमिवाभवत्॥ इत्यादिपर्वणि नारद उ उत्सवे वृत्तमात्रे तु त्रैलोक्याकांक्षिणावुभौ। मंत्रयि
त्वा ततः सेनां तावाज्ञापयतां तदा। सुहृद्भिरभ्यनुज्ञातौ दैत्यवृद्धैश्च मंत्रिभिः। कृत्वा प्रास्थानिकं रात्रौ मघासु
ययतुस्तदा। गदापट्टिशधारिण्या शूलमुद्गरहस्तया। प्रस्थितौ सहधर्मिण्या महत्या दैत्यसेनया। मंगलै

स्तुतिभिश्चापिविजयप्रतिसंहितैः।चारणैस्तूयमानौतौजग्मतुःपरयामुदा।तावन्तरिक्षमुत्पत्यदैत्यौकामग
मावुभौ।देवानामेवभवनंजग्मतुर्युद्धदुर्मदौ।तयोरागमनंज्ञात्वावरदानंचतत्प्रभोः।हित्वात्रिविष्टपंजग्मु
र्ब्रह्मलोकंततःसुराः।ताविंद्रलोकंनिर्जित्ययक्षरक्षोगणांस्तदा।खेचराण्यपिभूतानिजघ्नतुस्तीव्रविक्रमौ।
अन्तर्भूमिगतान्नागाञ्जित्वातौचमहारथौ।समुद्रवासिनःसर्वाम्लेच्छजातीर्विजिग्यतुः।ततःसर्वांमहींजेतु
मारब्धावुग्रशासनौ।सैनिकांश्चसमाहूयसुतीक्ष्णांवाक्यमूचतुः।राजर्षयोमहायज्ञैर्हव्यकव्यैर्द्विजात
यः।तेजोबलंचदेवानांवर्द्धयन्तिश्रियंतथा।तेषामेवंप्रवृत्तानांसर्वेषामसुरद्विषां।संभूयसर्वैरस्माभिः
कार्यःसर्वात्मनावधः।एवंसर्वान्समादिश्यपूर्वतीरेमहोदधेः।क्रूरांमतिंसमास्थायजग्मतुःसर्वतोमु
खौ।यज्ञैर्यजंतियेकेचिद्याजयन्तिचयेद्विजाः।तान्सर्वान्प्रसभंहत्वाबलिनौजग्मतुस्ततः।आश्रमेष्वग्निहो
त्राणिमुनीनांभावितात्मनां।गृहीत्वाप्रक्षिपंत्यप्सुविस्रब्धंसैनिकास्तयोः।तपोधनैश्चयेक्रुद्धैःशापाउक्ता
महात्मभिः।नाक्रामन्तस्तयोस्तेपिवरदाननिराकृताः।नाक्रामन्तयदाशापावाणामुक्ताःशिलास्विव।निय
मान्संपरित्यज्यव्यद्रवन्तद्विजातयः।पृथिव्यांयेतपःसिद्धादान्ताःशमपरायणाः।तयोर्भयाद्दुद्रुवुस्तेवैन

तैर्यादिवोरगाः मथितै राश्रमैर्भग्नैर्विकीर्णैः कलशाश्रुचैः । शून्यमासीज्जगत्सर्वं कालेनेव हतं तदा ॥ ततो राजन्ने
श्री०प० दृश्यपङ्क्तिऋषिभिश्च महासुरौ । उभौ विनिश्चयं कृत्वा विकुर्वीतेव घोषिणौ । अभिन्नकरटौ मत्तौ भूत्वा कुंजरदू
३०१ पिणौ । संलीनमपि दुर्गेषु निन्यतुर्यमसादनं । सिंहौ भूत्वा पुनर्व्याघ्रौ पुनश्चान्तर्हितावुभौ । तैस्तै रुपायै
स्तौ क्रूरावृषीन्द्रदृष्ट्वा निजघ्नतुः । निवृत्तयज्ञस्वाध्याया प्रनष्टनृपतिर्द्विजा । उत्सन्नोत्सवयज्ञा च वभूव वसुधा
तदा । हाहाभूता भयार्त्ता च निवृत्तविपणापणा । निवृत्तदेवकार्य्या च पुण्योद्वाहविवर्जिता । निवृत्तकृषिगो
रक्षा विध्वस्तनगराश्रमा । अस्थिकंकालसंकीर्णा भूर्वभूवोग्रदर्शना । निवृत्तपितृकार्य्यं च निर्वषट्कार
मंगलं । जगत्प्रतिभयाकारं दुःप्रेक्ष्यमभवत्तदा । चंद्रादित्यौ ग्रहास्तारा नक्षत्राणि दिवौकसः । जग्मुर्विषादं
तत्कर्म्म दृष्ट्वा सुंदोपसुंदयोः । एवं सर्वा दिशो दैत्यौ जित्वा क्रूरेण कर्म्मणा । निःसपत्नौ कुरुक्षेत्रे निवेशमभि ३०१
चक्रतुः ॥ इत्यादिपर्वणि ॥ नारद उ ॥ ततो देवर्षयः सर्वे सिद्धाश्च परमर्षयः । जग्मुस्तदा परामा
र्त्तिं दृष्ट्वा तत्कदनं महत् । ते भिजग्मुर्जितक्रोधा जितात्मानो जितेंद्रियाः । पितामहस्य भवनं जगतः कृपया
तदा । ततो ददृशुरासीनं सह देवैः पितामहं । सिद्धैर्ब्रह्मर्षिभिश्चैव समन्तात्परिवारितं । तत्र देवो महादेवस्त

त्वाग्निर्वायुनासह। चंद्रादित्यौ चशक्रश्च पारमेष्ठ्यास्तथर्षयः। वैखानसा वालिखिल्या वानप्रस्था मरीचि
पाः। अजाश्चैवाविमूढाश्च तेजोगर्भास्तपस्विनः। ऋषयः सर्व एवैते पितामहमुपागमत्। ततोभिगम्य ते दी
नाः सर्व एव महर्षयः। सुंदोपसुंदयोः कर्म सर्व एव शशंसिरे। यथा हृतं यथा चैव कृतं येन क्रमेण च। न्य
वेदयंस्ततः सर्वमखिलेन पितामहे। ततो देवगणाः सर्वे ते चैव परमर्षयः। तमेवार्थं पुरस्कृत्य पितामहम
चोदयन्। ततः पितामहः श्रुत्वा सर्वेषां तद्वचस्तदा। मुहूर्तमिव संचिन्त्य कर्तव्यस्य च निश्चयं। तयोर्वधं स
मुद्दिश्य विश्वकर्माणमाह्वयत्। दृष्ट्वा च विश्वकर्माणं व्यादिदेश पितामहः। सृज्यतां प्रार्थनीयेका प्रमदे
ति महातपाः। पितामहं नमस्कृत्य तद्वाक्यमभिनंद्य च। निर्ममे योषितं दिव्यां चिंतयित्वा पुनः पुनः। त्रिषु
लोकेषु यत्किंचिद्भूतं स्थावरजंगमं। समानयद्दर्शनीयं तत्तद्यत्र स विश्ववित्। कोटिशश्चैव रत्नानि तस्या
गात्रे न्यवेशयत्। तां रत्नसंघातमयीमसृजद्देवरूपिणीं। सा प्रयत्नेन महता निर्मिता विश्वकर्मणा। त्रिषु लो
केषु नारीणां रूपेणाप्रतिमाभवत्। न तस्याः सूक्ष्ममप्यस्ति यद्गात्रे रूपसंपदा। नियुक्ता यत्र वा दृष्टिर्न सज्जति
दिवौकसां। सा विग्रहवतीव श्रीः कामरूपवपुष्मती। जहार सर्वभूतानां चक्षूंषि च मनांसि च। तिलं तिलं समा

श्री०प० नीयरत्नानां यद्धि निर्मिता। तिलोत्तमेति तत्तस्या नाम चक्रे पितामहः। ब्रह्माणं सा नमस्कृत्य प्रांजलिर्वाक्यमब्र
३०२ वीत्। किं कार्यं मयि भूतेश येनास्म्यद्य हि निर्मिता॥ पितामह उ॥ गच्छ सुंदोपसुंदाभ्यामसुराभ्यां तिलो
त्तमे। प्रार्थनीयेन रूपेण कुरु भद्रे प्रलोभनं। त्वत्कृते दर्शनादेव रूपसंपत्कृतेन वै। विरोधः स्याद्यथा ताभ्या
मन्योन्येन तथा कुरु नारद उ सा तथेति प्रतिज्ञाय नमस्कृत्य पितामहं। चकार मंडलं तत्र विबुधा
नां प्रदक्षिणं। प्राङ्मुखो भगवानास्ते दक्षिणेन महेश्वरः। देवाश्चैवोत्तरेणासन् सर्वतस्त्वृषयोऽभवन्। कुर्व
त्यास्तु तथा तत्र मंडलं तत्प्रदक्षिणं। इंद्रः स्थाणुश्च भगवान् धैर्येण प्रत्यवस्थितौ। द्रष्टुकामस्य चात्यर्थं
गतया पार्श्वतस्तया। अन्यदंचितपक्ष्मांतं दक्षिणं निःसृतं मुखं। पृष्ठतः परिवर्तन्त्याः पश्चिमं निःसृतं मुखं।
गतया चोत्तरं पार्श्वमुत्तरं निःसृतं मुखं। महेंद्रस्यापि नेत्राणां पार्श्वतः पृष्ठतोऽग्रतः। रक्तांतानां विशालानां स ३०२
हस्रं सर्वतोऽभवत्। एवं चतुर्मुखः स्थाणुर्महादेवोऽभवत्पुरा। तथा सहस्रनेत्रश्च बभूव बलसूदनः। तथा देव
निकायानां महर्षीणां च सर्वशः। मुखानि त्वभ्यवर्तंत येन याति तिलोत्तमा। तस्या गात्रे निपतिता तेषां दृ
ष्टिर्महात्मनां। सर्वेषामेव भूयिष्ठमृते देवं पितामहं। गच्छंत्या तु तया सर्वे देवाश्च परमर्षयः। कृतमित्येव

तत्कार्य्यमेनिरेक्ष्यसम्पदा।तिलोत्तमायांतस्यांतुगतायांलोकभावनः।सर्व्वांश्चविसर्ज्जयामासदेवानृषिगणां
स्तुतान् इत्यादिपर्व्वणिसुंदोपसुंदोपाख्याने नारदउ जित्वातुपृथिवींदैत्यौनिःसपत्नौग
तव्यथौ।कृत्वात्रैलोक्यमेकाग्र्यंकृतकृत्यौबभूवतुः।देवगंधर्व्वयक्षाणांनागपार्थिवरक्षसां।आदायस
र्व्वरत्नानिपरांतुष्टिमुपागतौ।यदानप्रतिषेद्धारस्तयोःसंतीहकेचन।निरुद्योगौतदाभूत्वाविजह्रातेम
राविव।स्त्रीभिर्माल्यैश्चगंधैश्चभक्ष्यैर्भोज्यैःसुपुष्कलैः।पानैश्चविविधैर्हृद्यैःपरांप्रीतिमवापतुः।अंतःपु
रवनोद्यानेपर्व्वतेषुवनेषुच।यथेप्सितेषुदेशेषुविजह्रातेमराविव।ततःकदाचिद्विंध्यस्यप्रस्थेसमशि
लातले।पुष्पिताग्रेषुशालेषुविहारमभिजग्मतुः।दिव्येषुसर्व्वकामेषुसमानीतेषुतत्रवै।वरासनेषुसं
हृष्टौसहस्त्रीभिर्निषीदतुः।ततोवादित्रनृत्याभ्यामुपातिष्ठन्तितौस्त्रियः।गीतैश्चस्तुतिसंयुक्तैःप्रीत्यर्थं
मुपजग्मिरे।ततस्तिलोत्तमातत्रवनेपुष्पाणिचिन्वती।वेशमाक्षिप्तमाधायरक्तेनैकेनवाससा।नदीती
रेषुजातान्साकर्णिकारान्विचिन्वती।शनैर्जगामतंदेशंयत्रास्तांतौमहासुरौ।तौतुपीत्वावरंपानंमदरक्ता
न्तलोचनौ।दृष्ट्वैवतांवरारोहांव्यथितौसंबभूवतुः।तावुत्थायासनंहित्वाजग्मतुर्यत्रसास्थिता।उभौच

कामसंमत्तावुभौप्रार्थयतश्चतां।दक्षिणेतांकरेसुभ्रूंसुंदोजग्राहपाणिना।उपसुंदोपिजग्राहवामेपाणौ
आ०प० तिलोत्तमां।वरप्रदानमत्तौतावौरसेनवलेनच।धनरत्नमदाभ्यांचसुरापानमदेनच।सर्वैरेतैर्मदैर्मत्ताव
३०३ न्योन्यंभ्रुकुटीकृतौ।मदकामसमाविष्टौपरस्परमथोचतुः।ममभार्यातवगुरुरितिसुंदोभ्यभाषत।म
मभार्यातववधूरुपसुंदोभ्यभाषत।नैषातवममैषेतितत्रतौमन्युराविशत्।तस्याहृपेणसंमत्तौवि
गतस्नेहसौहृदौ।तस्याहेतोर्गदेभीमेसंगृह्णीतामुभौतदा।प्रगृह्यचगदेभीमेतस्यांतौकाममोहितौ।अ
हंपूर्वमहंपूर्वमित्यन्योन्यंनिजघ्नतुः।तौगदाभिहतौभीमौपेततुर्धरणीतले।रुधिरेणावसिक्तांगौद्वावि
वार्कौनभश्च्युतौ।ततस्ताविद्रुतानार्यःसचदैत्यगणस्तथा।पातालमगमत्सर्वोविषादभयकंपितः।त
तःपितामहस्तत्रसहदेवैर्महर्षिभिः।आजगामविशुद्धात्मापूजयंश्चतिलोत्तमां।वरेणछंदयामासभ ३०३
गवान्प्रपितामहः।वरंदित्सुःसतत्रैनांप्रीतःप्राहपितामहः।आदित्यचरितांल्लोकान्विचरिष्यसिभाविनि।
तेजसाचसुदृष्टांत्वांनकरिष्यतिकश्चन।एवंतस्यैवरंदत्वासर्वलोकपितामहः।इंद्रेत्रैलोक्यमाधायब्र
ह्मलोकंगतःप्रभुः॥ नारदउ ॥एवंतौसहितौभूत्वासर्वार्थेष्वेकनिश्चयौ।तिलोत्तमार्थसंक्रुद्धा

वन्योन्यमभिजघ्नतुः।तस्माद्ब्रवीमितेस्नेहात्सर्वान्भरतसत्तमाः।यथावोनात्रभेदःस्यात्सर्वेषांद्रौपदी
कृते।तथाकुरुतभद्रंवोममचेत्प्रियमिच्छथ॥ वैशं ॥एवमुक्तामहात्मानोनारदेनमहर्षिणा।
समयंचक्रिरेराजंस्तेन्योन्यवशमागताः।समक्षंतस्यदेवर्षेर्नारदस्यामितौजसः।द्रौपद्यानःसमासी
नमन्योन्यंयोभिदर्शयेत्।सनोद्वादशवर्षाणिब्रह्मचारीवनेवसेत्।कृतेतुसमयेतस्मिन्पांडवैर्धर्मचारिभिः
नारदोप्यगमत्प्रीतइष्टंदेशंमहामुनिः।एवंतैःसमयःपूर्वंकृतोनारदचोदितैः।नचाभिद्यंततेसर्वेतदान्योन्ये
नभारत इत्यादिपर्वणिसुंदोपसुंदोपाख्यानसमाप्तम् वैशं एवंतेसमयंकृत्वान्यवसं
स्तत्रपांडवाः।वशेशस्त्रप्रतापेनकुर्वंतोन्यान्महीक्षितः।तेषांमनुजसिंहानांपंचानाममितौजसां।ब
भूवकृष्णासर्वेषांपार्थानांवशवर्त्तिनी।अनुयातैश्चसावीरैःपतिभिःसहपंचभिः।बभूवपरमप्रीतानाना
गैरिवसरस्वती।वर्त्तमानेषुधर्मेणपांडवेषुमहात्मसु।व्यवर्धन्कुरवःसर्वेहीनदोषाःसुखान्विताः।अ
थदीर्घेणकालेनब्राह्मणस्यविशांपते।कस्यचित्तस्कराजह्नुःकेचिद्गानृपसत्तम।ह्रियमाणेधनेतस्मि
न्ब्राह्मणःक्रोधमूर्च्छितः।आगम्यखांडवप्रस्थमुदक्रोशत्सपांडवान्।ह्रियतेगोधनंक्षुद्रैर्नृशंसैरकृ

आ०प०
३०४

तात्मभिः। प्रसह्यवोद्यविषयादभिधावतपांडवाः। ब्राह्मणस्यप्रशांतस्यहविर्ध्वांक्षैर्विलुप्यते। शार्दूलस्य
गुहांक्रूरांनीचः क्रोष्टाभिमर्द्दति। अरक्षितारंराजानंबलिषड्भागहारिणं। तमाहुः सर्व्वलोकस्यसमग्र
पापचारिणं। ब्राह्मणस्वेहृतेचौरैर्धर्म्मार्थेचविलोपिते। रोरूयमाणेचमयिक्रियतामस्त्रधारणं ॥
वैशं ॥ रोरूयमाणस्याभ्यासेभृशंविप्रस्यपांडवः। तानिवाक्यानिश्रुत्वावकुंतीपुत्रोधनंजयः। अ
त्वैवृतन्महाबाहुर्माभैरित्याहतंद्विजं। आयुधानिचयत्रासन्पांडवानांमहात्मनां। कृष्णयासहतत्रासी
द्धर्म्मराजोयुधिष्ठिरः। सप्रवेशायचाशक्तोगमनायचपांडवः। तस्यचार्त्तस्यतैर्वाक्यैश्चोद्यमानःपुनः
पुनः। आक्रंदेनतुकौंतेयश्चिंतयानःसुदुःखितः। ह्रियमाणेधनेतस्मिन्ब्राह्मणस्यतपस्विनः। अ
श्रुप्रमार्ज्जनंतस्यकर्त्तव्यमितिनिश्चितः। उपप्रेक्षणजोधर्म्मःसुमहान्स्यान्महीपते॥ यद्यस्यरुदतो ३०४
द्वारिनकरोम्यद्यरक्षणं। अनास्तिक्यंचसर्वेषामस्माकंचस्वरक्षणे। प्रतिष्ठितश्चलोकेस्मिन्नध
र्म्मश्चैवनोभवेत्। अनापृच्छ्यचराजानंगतेमयिनसंशयः। अजातशत्रोःसुमहन्ममचैवाप्रियंभवेत्
। अनुप्रवेशेराज्ञस्तुवनवासोभवेन्मम। सर्व्वमन्यत्परिहृतंधर्षणंतुमहीपतेः। अधर्म्मोवामहान

स्तुचनेवागमनंममाच्छरीरस्यापिनाशोनधर्म्मएवविशिष्यते।एवंविनिश्चित्यततःकुंतीपुत्रोधनं
जयः।अनुप्रविश्यराजानमामंत्र्यचविशांपते।धनुरादायसंहृष्टोब्राह्मणंप्रत्यभाषत।ब्राह्मणाग
म्यतांशीघ्रंयावत्परधनैषिणः।नदूरंतेगताःक्षुद्रास्तावद्गच्छावहेसह।यावन्निवर्त्तयाम्यद्यचौरह
स्ताद्धनंतव।सोनुसृत्यमहाबाहुर्धन्वीवर्मीरथीध्वजी।शरैर्विध्वंसितांश्चौरानवजित्यचतद्धनं।
ब्राह्मणस्यमुपाहृत्ययशःप्राप्यचपांडवः।ततस्तद्गोधनंपार्थोदत्वातस्मैद्विजातये।आजगामपु
नर्वीरःसव्यसाचीपरंतपः।सोभिवाद्यगुरून्सर्वांस्तैश्चापिप्रतिनंदितः।धर्म्मराजमुवाचेदंव्रत
मादिश्यतांमम।समयःसमतिक्रांतोभवत्संदर्शनेमया।वनवासंगमिष्यामिसमयोह्येषनःकृ
तः।इत्युक्तोधर्म्मराजस्तुसहसावाक्यमप्रियं।कथंचिदब्रवीद्वाचाशोकार्त्तःसज्जमानया।युधि
ष्ठिरोगुडाकेशंभ्राताभ्रातरमित्युत।उवाचदीनोराजाचधनंजयमिदंवचः।प्रमाणमस्मियदितेम
त्तःशृणुवचोनघ।अनुप्रवेशेयद्वीरकृतवांस्त्वंममाप्रियं।सर्वंतदनुमृष्यामिव्यलीकंनचमेहृदि।
गुरोरनुप्रवेशोहिनोपघातोयवीयसः।यवीयसोनुप्रवेशोज्येष्ठस्यविधिलोपकः।निवर्त्तस्वम

हायाहोक्कुरुश्रेष्ठवचनंमम।नहितेधर्म्मलोपोस्तिनचमेधर्षणाकृता अर्जुनउ नव्याजेनचरेद्धर्ममि
तिमेभवतःश्रुतं।नसत्याद्विचलिष्यामिसत्येनायुधमालभे वैशं सोभ्यनुज्ञाप्यराजानंब्रह्मचर्य्यायदी
क्षितः।वनेद्वादशवर्षाणिवासायोपजगाम६ इत्यादिपर्वण्यर्जुनतीर्थयात्रायाम् वैशम् ॥
तंप्रयांतंमहावाहुंकौरवाणांयशस्करं।अनुजग्मुर्महात्मानोब्राह्मणावेदपारगाः।वेदवेदांगविद्वांस
स्तथैवाध्यात्मचिंतकाः।लोकाश्चभगवद्भक्ताः सूताःपौराणिकाश्चये।कथकाश्चापरेराजन्श्रमणाश्चव
नौकसः।दिव्याख्यानानियेचापिपठंतिमधुरंद्विजाः।एतैश्चान्यैश्चबहुभिःसहायैःपांडुनंदनः।वृतःश्लक्ष्ण
कथैःप्रायान्मरुद्भिरिववासवः।रमणीयानिचित्राणिकाननानिसरांसिच।सरितःसागरांश्चैवदेशान
पिचभारत।पुण्यानिचैवतीर्थानिददर्शकुरुनंदनः।सगंगाद्वारमासाद्यनिवेशमकरोत्प्रभुः।तत्रतस्या ३०५
द्भुतंकर्मशृणुमेजनमेजय।कृतवान्यद्विशुद्धात्मापांडूनांप्रवरोहिसः।निविष्टेतत्रकौंतेयेब्राह्मणेषुचभार
त।अग्निहोत्राणिविप्राश्चप्रादुश्चक्रुरनेकशः।तेषुप्रबोध्यमानेषुज्वलितेष्वनलेषुच।कृतपुष्पोपहारेषु
तीरांतरगतेषुच।कृताभिषेकैर्विद्वद्भिर्नियतैःसत्पथेस्थितैः।शुशुभेतीवतद्राजन्गंगाद्वारंमहात्म

जिः॥ तथा पर्य्याकुले तस्मिन्निवेशे पांडुनंदनः॥ अभिषेकाय कौंतेयो गंगामवततार ह॥ तत्राभिषेकं कृत्वा
स तर्पयित्वा पितामहान्॥ उत्तितीर्षुर्ज्जलाद्राजन्नग्निकार्यचिकीर्षया॥ अपकृष्टो महाबाहुर्न्नागराजस्य कन्य
या॥ अंतर्ज्जले महाराज उलूप्या काममानया॥ ददर्श पांडवस्तत्र पावकं सुसमाहितं॥ कौरव्यस्याथ नागस्य भ
वने परमार्च्चिते॥ तत्राग्निकार्य्यं कृतवान् कुंतीपुत्रो धनंजयः॥ अशंकमानेन हुते स्तेनातुष्यद्धुताशनः॥ अग्नि
कार्यं स कृत्वा तु नागराजसुतां तदा॥ प्रहसन्निव तेजस्वी वाक्यमेतदुवाच ह॥ किमिदं साहसं भीरु कृतवत्य
सि भाविनि॥ कस्यायं सुभगे देशः का च त्वं कस्य चात्मजा॥ उलूप्युवाच ऐरावतकुले जातः कौरव्यो
नाम पन्नगः॥ तस्यास्मि दुहिता राजन्नुलूपी नाम पन्नगी॥ साहं त्वामभिषेकार्थमवतीर्णं समुद्रगां॥ दृष्ट्वैव पुरु
षव्याघ्र कंदर्पेणास्मि पीडिता॥ तां मामनंगग्लपितां त्वत्कृते पांडुनंदन॥ अनन्यां नंदयस्वाद्य प्रदानेनात्म
नो रह॥ अर्ज्जुन उ॰ ब्रह्मचर्यमिदं भद्रे मम द्वादशवार्षिकं॥ धर्म्मराजेन निर्द्दिष्टं नाहमस्मि स्वयंवशः॥
तव चापि प्रियं कर्त्तुमिच्छामि जलचारिणि॥ अनृतं नोक्तपूर्वं च मया जातु वरानने॥ कथं च नानृतं तत्स्यात्तव चा
पि प्रियं भवेत्॥ न च पीड्येत मे धर्म्मस्तथा कुरु भुजंगमे॥ उलूप्युवाच ॥ जानाम्यहं पांडवेय यथा चर

आ०प०
३०६

सिमेदिनं।यथाचतेब्रह्मचर्य्यमिदमादिष्टवान्गुरुः।परस्परंवर्त्तमानान्द्रुपदस्यात्मजांप्रति।योनोत्रप्रविशेन्मो
हात्सनोद्वादशवार्षिकं।वनेचरेद्ब्रह्मचर्य्यमितिवः समयः कृतः।तदिदंद्रौपदीहेतोरन्योन्यस्यप्रवासनं।कृतवां
स्तत्रधर्म्मार्थमत्रधर्म्मोनदुष्यति।परित्राणंचकर्त्तव्यमार्त्तानांपृथुलोचन।कृत्वाममपरित्राणंतवधर्म्मोनलु
प्यते।यदिवाप्यस्यधर्मस्यसूक्ष्मोपिस्याद्व्यतिक्रमः।सचतेधर्म्मएवस्याद्दत्वाप्राणान्ममार्जुन।भक्तांचभज
मांपार्थसतामेतन्मतंप्रभो।नकरिष्यसिचेदेवंमृतांमामुपधारय।प्राणदानान्महाबाहोचरधर्ममनुत्तमं।
शरणंचप्रपन्नास्मित्वामद्यपुरुषोत्तम।दीनाननाथान्कौन्तेयपरिरक्षसिनित्यशः।साहंशरणमभ्येमिरोर
वीमिचदुःखिता।याचेत्वांचाभिकामाहंतत्कुरुष्वममप्रियं।सत्वमात्मप्रदानेनसकामांकर्त्तुमर्हसि वैशं
॥ एवमुक्तस्तुकौन्तेयः पन्नगेश्वरकन्यया।कृतवांस्तत्तथासर्व्वंधर्म्ममुद्दिश्यकारणं।सनागभवनेरात्रिंतामु ३०६
षित्वाप्रतापवान्।उदितेभ्युत्थितः सूर्येकौरव्यस्यनिवेशनात्।आगतस्तुपुनस्तत्रगंगाद्वारंतयासह।परिष्वज्य
गतासाध्वीउलूपीनिजमंदिरं।दत्वावरमजेयत्वंजलेसर्व्वत्रभारत।साध्याजलचराः सर्व्वेभविष्यन्तिनसंश
यः॥ इत्यादिपर्वण्यर्जुनतीर्थयात्रायाम् वैशं कथयित्वातुतत्सर्व्वंब्राह्मणेभ्यः सभारत।प्र

ययौहिमवतःपार्श्वंततोवज्रधरात्मजः।अगस्त्यवटमासाद्यवसिष्ठस्यचपर्वतं।भृगुतुंगेचकौंतेयःकृतवांछौ
चमात्मनः।प्रददौगोसहस्राणिसुबहूनिचभारत।निवेशांश्चद्विजातिभ्यःसोददत्कुरुसत्तमः।हिरण्यविंदो
स्तीर्थेचस्नात्वापुरुषसत्तमः।दृष्टवान्पांडवश्रेष्ठःपुण्यान्यायतनानिच।अवतीर्यनरश्रेष्ठोब्राह्मणैःसहभा
रत।प्राचींदिशमभिप्रेप्सुर्जगामभरतर्षभः।आनुपूर्व्येणतीर्थानिदृष्टवान्कुरुसत्तमः।नदींचोत्पलिनींरम्या
मरण्यंनैमिषंप्रति।नंदामपरनंदांचकौशिकींचयशस्विनीं।महानदींगयांचैवगंगामपिचभारत।एवंसर्वा
णितीर्थानिपश्यमानस्तथाश्रमान्।आत्मनःपावनंकुर्वन्ब्राह्मणेभ्योददौवसु।अंगवंगकलिंगेषुयानि
तीर्थानिकानिचित्।जगामतानिसर्वाणिपुण्यान्यायतनानिच।दृष्ट्वाचविधिवत्तानिधनंचापिददौततः।क
लिंगराष्ट्रद्वारेतुब्राह्मणाःपांडवानुगाः।अभ्यनुज्ञायकौंतेयमुपावर्तंतभारत।सतुतैरभ्यनुज्ञातःकुंतीपुत्रो
धनंजयः।सहायैरल्पकैःशूरःप्रययौयत्रसागरः।सकलिंगानतिक्रम्यदेशानायतनानिच।वनानिरमणी
यानिप्रेक्षमाणोययौप्रभुः।महेंद्रपर्वतंदृष्ट्वातापसैरुपशोभितं।समुद्रतीरेणशनैर्मणिपूरंजगामह।तत्र
सर्वाणितीर्थानिपुण्यान्यायतनानिच।अभिगम्यमहाबाहुरभ्यगच्छन्महीपतिं।मणिपूरेश्वरंराजन्धर्मज्ञं

चित्रवाहनो। तस्य चित्रांगदा नाम दुहिता चारुदर्शना। तां ददर्श पुरे तस्मिन्विचरंतीं यदृच्छया। दृष्ट्वा च तां व
रारोहां चकमे चैत्रवाहिनीं। तस्याः स पितरं गत्वाभ्यज्ञप स्वं प्रयोजनं। देहि मे स्वसुतां राजन्क्षत्रियाय महा
त्मने। तच्छ्रुत्वा चाब्रवीद्राजा कस्य पुत्रोसि नाम किं। तमुवाच पांडवोहं कुंतीपुत्रो धनंजयः। तमुवाचाथ
राजा स सांत्वपूर्वमिदं वचः। राजा प्रभंकरो नाम कुलेस्मिन्संबभूव ह। अपुत्रः प्रसवेनार्थी तपस्तेपे स उत्त
मं। उग्रेण तपसा तेन देवदेवः पिनाकधृक्। ईश्वरस्तोषितः पार्थ महादेव उमापतिः। स तस्मै भगवान्प्रादादे
कैकं प्रसवं कुले। एकैकः प्रसवस्तस्माद्भवत्यस्मिन्कुले सदा। तेषां कुमाराः सर्वेषां पूर्वेषां मम जज्ञिरे।
कन्या तु मम जातेयं कुलस्योत्पादनं ध्रुवं। पुत्रो ममायमिति मे भावना पुरुषर्षभ। पुत्रिका हेतुविधिना
संज्ञिता भरतर्षभ। तस्मादेकः सुतो योस्यां जायते भारत त्वया। एतच्छुल्कं भवत्वस्याः कुलकृज्जायतामिति। ३०७
एतेन समयेनेमां प्रतिगृह्णीष्व पांडव। स तथेति प्रतिज्ञाय तां कन्यां प्रतिगृह्य च। उवास नगरे तस्मिंस्त्रिस्रः
कुंतीसुतः समाः। तस्यां सुते समुत्पन्ने परिष्वज्य वरांगनां। आमंत्र्य नृपतिं तं तु जगाम परिवर्तितुं॥ इ
त्यादिपर्वण्यर्जुनतीर्थयात्रायाम्   वैशं   ततः समुद्रे तीर्थानि दक्षिणे पुरुषर्षभ। अभ्यगच्छत्सपु

एषानिशोभितानितपस्विभिः। वर्ज्जयंतिचतीर्थानिपंचतत्रतुतापसाः। अथकीर्ण्णानियान्यासन्पुरस्तात्तुतप
स्विभिः। अगस्त्यतीर्थंसौभद्रंपौलोमंचसुपावनं। करंधमंप्रसन्नंचहयमेधफलंचयत्। भारद्वाजस्यतीर्थं
तुपापप्रसमनंमहत्। एतानिपंचतीर्थानिददर्शकुरुसत्तमः। विविक्तान्युपलक्ष्याथतानितीर्थानिपांडवः।
दृष्ट्वाचवर्ज्ज्यमानानिमुनिभिस्तत्वदर्शिभिः। तपस्विनस्ततोपृछत्प्रांजलिःकुरुसत्तमः। तीर्थानीमानिव
र्ज्यन्तेकिमर्थंब्रह्मवादिभिः तापसाऊचुः ग्राहाःपंचवसंत्येषुहरंतिचतपोधनान्। अतएतानि
वर्ज्यन्तेतीर्थानिकुरुनंदन वैशं तेषांश्रुत्वामहाबाहुर्व्वार्यमाणस्तपोधनैः। जगामतानितीर्थानि
द्रष्टुंपुरुषसत्तमः। ततःसौभद्रमासाद्यमहर्षेस्तीर्थमुत्तमं। विगाह्यसहसावीरःस्नानंचक्रेपरंतपः। अ
थतंपुरुषव्याघ्रमंतर्ज्जलचरोमहान्। जग्राहचरणेग्राहःकुंतीपुत्रंधनंजयं। सतमादायकौंतेयोविस्फुरंतं
जलेचरं। उदतिष्ठन्महाबाहुर्व्वलेनबलिनांवरः। उत्कृष्टएवग्राहस्तुसोर्ज्जुनेनयशस्विना। वभूवनारीकल्या
णीसर्व्वाभरणभूषिता। दीप्यमानाश्रियाराजन्दिव्यरूपामनोरमा। तदद्भुतंमहद्दृष्ट्वाकुंतीपुत्रोधनंजयः।
तांस्त्रियंपरमप्रीतइदंवचनमब्रवीत्। कावैत्वमसिकल्याणिकुतोवासिजलेचरी। किमर्थंचमहत्पापमि

आ०प० दंकृतवतीपुरा नार्ज्जु अप्सरास्मि महाबाहो देवारण्यविहारिणी। इष्टा धनपतेर्न्नित्यं वर्गा नाम मह
३०८ बल। मम सख्यश्चतस्रोन्याः सर्व्वाः कामगमाः शुभाः। ताभिः सार्द्धं प्रयातास्मि लोकपालनिवेशनं। ततः पश्या
महे सर्व्वा ब्राह्मणं शंसितव्रतं। तपस्विनं रूपवंतमेकमेकांतचारिणं। तस्यैव तपसा वीर तद्वनं तेजसावृतं। आ
दित्य इव तं देशं कृत्स्नं सर्व्वं प्रकाशयत्। तस्य दृष्ट्वा तपस्तादृग्रूपं चाद्भुतदर्शनं। अवतीर्णाः स्म तं देशं तपोवि
घ्नचिकीर्षया। अहं च सौरभेयी च समीची बुद्बुदा लता। यौगपद्येन तं विप्रमभ्यगच्छाम भारत। गायंत्योथ
हसंत्यश्च लोभयंत्यश्च तं द्विजं। स च नास्मासु कृतवान्मनो धीरः कथंचन। नाकंपत महातेजाः स्थितस्तपसि
निर्मले। सोशापत्कुपितोस्मांस्तु ब्राह्मणः क्षत्रियर्षभ। ग्राहभूता जले यूयं चरिष्यध्वं शतं समाः ॥ इ
त्यादिपर्व्वण्यर्ज्जुनतीर्थयात्रायां वर्गोवाच ततो वयं प्रव्यथिताः सर्व्वा भरतसत्तम। आयाम श ३०८
रणं विप्रं तं तपोधनमच्युतं। रूपेण वयसा चैव कंदर्प्पेण च दर्पिताः। अयुक्तं कृतवत्यः स्म क्षंतुमर्हसि
नो द्विज। एष एव वधोस्माकं सुपर्य्याप्तस्तपोधन। यद्वयं शंसितात्मानं प्रलब्धुं त्वामुपागताः। अवध्यास्तु
स्त्रियः सृष्टा मन्यंते धर्म्मचिंतकाः। तस्माद्धर्म्मेण वर्द्ध त्वं नास्मान्हिंसितुमर्हसि। सर्व्वभूतेषु धर्म्मज्ञ मैत्रो

ब्राह्मण उच्यतो सत्सोम भवतु कल्याण एष वा दोमनीषिणां। शरणं च प्रपन्नानां शिष्टाः कुर्वन्ति पालनं। शरणं
त्वां प्रपन्नाः स्म तस्मात्त्वं द्रष्टुमर्हसि वैशं एवमुक्तः स धर्मात्मा ब्राह्मणः शुभकर्मकृत्। प्रसा
दं कृतवान्वीर स्वविसोमसमप्रभः॥ ब्राह्मण उ शतं शत सहस्रं च सर्वं मद्ध्यप्यवाचकं। परिमाणं शतं ते
तन्नेदं मद्ध्यप्यवाचकं। यदा वचो ग्राह्यभूता गृह्णन्तीः पुरुषानुलो। नत्कर्षति जलात्कश्चित्स्थलं पुरुषसत्त
मः। तदा यूयं पुनः सर्वाः स्वं रूपं प्रतिपत्स्यथ। अनृतं नोक्तपूर्वं मे हसतापि कदाचन। तानि सर्वाणि तीर्था
नि ततः प्रभृति चैव ह। नारीतीर्थानि नाम्नेह ख्यातिं यास्यंति सर्वशः। पुण्यानि च भविष्यंति पावनानि मनी
षिणं वर्गोवाच ततोभिवाद्य तं विप्रं कृत्वा चैव प्रदक्षिणं। अचिन्तयाम पस्त्वत तस्माद्देशात्सु
दुःखिताः। क्व नु नाम वयं सर्वाः कालेनाल्पेन नंतरं। समागच्छेम यो नस्तद्रूपमापादयेत्पुनः। तावद्यं चिंत
यित्वेह मुहूर्तादिव भारत। दृष्टवत्सो महाभाग देवर्षितत्र नारदं। संप्रहृष्टाः स्म तं दृष्ट्वा देवर्षिममितद्यु
तिं। अभिवाद्य च तं पार्थ स्थिता स्म व्रीडितानना। स नोऽपृच्छद्दुःखमूलमुक्तवत्यो वयं च तं तदा। श्रुत्वा तत्तु य
थावृत्तमिदं वचनमब्रवीत्। दक्षिणे सागरानूपे पंचतीर्थानि संति वै। पुण्यानि रमणीयानि तानि गच्छत

आ०प०
२०८

माचिरं॥ तत्रस्थाः पुरुषव्याघ्रः पांडवेयो धनंजयः॥ मोक्षयिष्यति शुद्धात्मा दुःखादस्मान्न संशयः॥ तस्य
सर्व्वा वयं वीर श्रुत्वा वाक्यमिहागताः॥ तदिदं सत्यमेवाद्य मोक्षिताहं त्वयानघ॥ एताः स्तु मम ताः सख्य
श्चतस्रोन्या जले स्थिताः॥ कुरु कर्म्म शुभं वीर एताः पापाद्विमोचय॥ वैशं॥ ततस्ताः पांडवश्रेष्ठः स
र्व्वा एव विशांपते॥ तस्माच्छापाददीनात्मा मोक्षयामास वीर्यवान्॥ उत्थाय तु जलात्तस्मात्प्रतिलभ्य व
पुः स्वयं॥ तास्तदाप्सरसो राजन्नदृश्यन्त यथा पुरा॥ तीर्थानि शोधयित्वा तु तथानुज्ञाय ताः प्रभुः॥ चित्रां
गदां पुनर्द्रष्टुं मणिपूरपुरं ययौ॥ तस्यामजनयत्पुत्रं राजानं बभ्रुवाहनं॥ तां दृष्ट्वा पांडवो राजन्गोकर्णम
भितोऽगमत्॥ इत्यादिपर्वण्यर्जुनतीर्थयात्रायां॥ वैशं॥ सोपरांतेषु तीर्थानि पुण्यान्या
यतनानि च॥ सर्व्वाण्येवानुपूर्व्वेण जगामामितविक्रमः॥ समुद्रे पश्चिमे यानि तीर्थान्यायतनानि च॥ ता २०८
नि सर्व्वाणि गत्वा स प्रभासमुपजग्मिवान्॥ प्रभासदेशं संप्राप्तं बीभत्सुमपराजितं॥ तीर्थान्यनुचरंतं व
शुश्राव मधुसूदनः॥ ततोभ्यगच्छत्कौंतेयं सखायं तत्र माधवः॥ ददृशाते तदान्योन्यं प्रभासे कृष्णपांडवौ॥
तावन्योन्यं समाश्लिष्य पृष्ट्वा च कुशलं वने॥ आस्तां प्रियसखायौ तौ नरनारायणावृषी॥ ततोर्जुनं वासु

देवस्तांचर्य्यापर्य्यपृच्छत।किमर्थ्यंपांडवेमानितीर्थान्यनुचरस्तुतातस्यार्जुनोयथावृत्तंसर्व्वमाख्यातवांस्तदा
श्रुत्वोवाचचवार्ष्णेयएवमेतदितिप्रभुः।तौविहृत्ययथाकामंप्रभासेकृष्णपांडवौ।महीधरंरैवतकंवासा
यैवाभिजग्मतुः।पूर्व्वमेवतुकृष्णस्यवचनात्तंमहीधरं।समत्तान्मंडयांचक्रुरुपजह्रुश्चभोजनं।प्रतिगृह्या
र्जुनःसर्व्वमुपभुज्यचपांडवः।सहैववासुदेवेनदृष्टवान्नटनर्त्तकान्।अभ्यनुज्ञायतान्सर्व्वानर्च्चयित्वाच
पांडवः।शयनंसत्कृतंदिव्यमभ्यगच्छन्महाद्युतिः॥ततस्तत्रमहाबाहुःशयानःशयनेशुभे।तीर्थानां
दर्शनंचैवपर्व्वतानांचभारत।आपगानांवनानांचकथयामाससात्वते।एवंसकथयन्नेवनिद्रयाज
नमेजय।कौन्तेयोपहृतस्तस्मिंछयनेस्वर्गसन्निभे।मधुरेणसगीतेनवीणाशब्देनचानघ।प्रबोध्यमानो
बुबुधेस्तुतिभिर्मंगलैस्तथा।सकृत्वावश्यकार्य्याणिवार्ष्णेयेनाभिनंदितः।रथेनकांचनांगेनद्वारकामभि
जग्मिवान्।अलंकृताद्वारकातुबभूवजनमेजय।कुंतीसुतस्यपूजार्थमपिनिष्कुटकेष्वपि।दिदृक्षंतश्चकौन्ते
यंद्वारकावासिनोजनाः।नरेंद्रमार्गमाजग्मुस्तूर्णंशतसहस्रशः।अवलोकेषुनारीणांसहस्राणिशता
निच।भोजवृष्ण्यंधकानांचसमवायोमहानभूत्।सतथासत्कृतःसर्व्वैर्भोजवृष्ण्यंधकादिभिः।अभिवाद्य

श्रा०प० भिवाद्यांश्च सर्वैश्च प्रतिनिंदितः। कुमारैः सर्वशो वीरः सत्कारेणाभिवादितः।। समानवयसः सर्व्वानाश्लि
३१० ष्य स पुनः पुनः। कृष्णस्य भवने रम्ये रत्नभोज्यसमावृते। उवास सह कृष्णेन वहुलास्तत्र शर्व्वरीः इत्या
दिपर्व्वण्यर्जुनतीर्थयात्रायाम् वैशं ततः कतिपयाहस्य तस्मिन्नैवतके गिरौ। वृष्ण्यंधकानाम
भवदुत्सवो नृपसत्तमा तत्रदानं ददुर्व्वीरा व्राह्मणानां सहस्रशः। भोज्यवृष्ण्यंधकाश्चैव महे तस्य गिरेस्त
दा। प्रासादै रत्नचित्रैश्च गिरेस्तस्य समंततः। स देशः शोभितो राजन्कल्पवृक्षैश्च सर्व्वशः। वादित्राणि च तत्रा
न्ये वादकाः समवादयन्। ननृतुर्न्नर्त्तकाश्चापि जगुर्गीतानि गायनाः। अलंकृताः कुमाराश्च वृष्णीनां सु
महौजसः। यानैर्हाटकचित्रैश्च चंचूर्यंते स्म सर्व्वशः। पौराश्च पादचारेण यानैरुच्चावचैस्तदा। सदाराः सा
नुयात्राश्च शतशोथ सहस्रशः। ततो हलधरः क्षीवो रेवतीसहितः प्रभुः। अनुगम्यमानो गंधर्वैरभवत्तत्र ३१०
भारत। तथैव राजा वृष्णीनामुग्रसेनः प्रतापवान्। उपगीयमानो गंधर्व्वैः स्त्रीसहस्रसहायवान्। रौहिणेय
श्च शांवश्च क्षीवौ समरदुर्म्मदौ। दिव्यमाल्यांवरधरौ विजह्रातेमराविव। अक्रूरः सारणश्चैव गदो वभ्रुर्वि
दूरथः। निशठश्चारुदेष्णश्च पृथुर्विपृथुरेव च। सत्यकः सात्यकिश्चैव ये चान्ये नानुकीर्त्तिताः। एते परिवृताः

स्त्रीमिर्गीघर्हैं श्च ए थक्पृथक्तमुत्सवं रैवतके शोभयांचक्रिरेतदा। तथाकोलाहलेतस्मिन्वर्त्तमानेमहाशुभे
ते। वासुदेवश्च पार्थश्च सहितौपरिजग्मतुः। तत्रचक्रम्यमाणौतौवसुदेवसुतां शुभां। अलंकृतांसखीमध्ये
सुभद्रांददृशतोर्जुनः। दृष्ट्वैवतामर्जुनस्यकंदर्पः समजायत। तंतदैकाग्रमनसंकृष्णः पार्थमलक्षयत्। अ
ब्रवीत्पुरुषव्याघ्रः प्रहसन्निवभारत। वनेचरस्यकिमिदंकामेनालोड्यतेमनः। ममैषाभगिनीपार्थसारण
स्यसहोदराः सुभद्रानामभद्रन्तेपितुर्मेदयितासुता। यदितेवर्त्ततेबुद्धिर्वक्ष्यामिपितरंस्वयं अर्जु
नउवाच दुहितावसुदेवस्यवासुदेवस्यचस्वसा। रूपेणचैषासंपन्नाकमिवैषानमोहयेत्। कृतमेव
तुकल्याणंसर्वंममभवेद्ध्रुवं। यदिस्यान्ममवार्ष्णेयीमहिषीयंस्वसातव। प्राप्तौतुकउपायःस्यात्तंब्रवीहि
जनार्द्दन। आस्थास्यामितदासर्वंयदिशक्यन्नरेणतत् वासुदेवउ स्वयंवरःक्षत्रियाणांविवा
हः पुरुषर्षभ। सचसंशयितःपार्थस्वभावस्यनिमित्ततः। प्रसह्यहरणंचापिक्षत्रियाणांप्रशस्यते। वि
वाहहेतोःशूराणामितिधर्म्मविदोविदुः। सत्वमर्जुनकल्याणींप्रसह्यभगिनींमम। हरःस्वयंवरेह्यस्याः
कोवैवेदचिकीर्षितं। ततोर्जुनश्चकृष्णश्चविनिश्चित्येतिकृत्यतां। शीघ्रगान्पुरुषानन्यान्प्रेषयामासतु

आ०प० स्तद्याधर्म्मराजायतत्सर्व्वंभिंद्रप्रस्थगतायवै।श्रुत्वैवचमहाबाहुरनुजज्ञेसपांडवः॥ इत्यादि
३११ पर्व्वणिसुभद्राहरणे वैशं ततःसंवादितेतस्मिन्ननुज्ञातोधनंजयः।गतांरैवतकेकन्यांविदित्वाजन
मेजय।वासुदेवाभ्यनुज्ञातःकथयित्वेतिकृत्यतां।कृष्णस्यमतमादायप्रययौभरतर्षभ।रथेनकांचनांगेनक
ल्पितेनयथाविधि।शैब्यसुग्रीवयुक्तेनकिंकिणीजालमालिना।सर्व्वशस्त्रोपपन्नेनजीमूतरचनादिना।ज्व
लिताग्निप्रकाशेनद्विषतांहर्षघातिना।सन्नद्धःकवचीखड्गीबद्धगोलांगुलित्रवान्।मृगयाव्यपदेशेनप्र
ययौपुरुषर्षभः।सुभद्रांत्वथशैलेंद्रमभ्यर्च्यवहिरैवतं।दैवतानिचसर्व्वाणिब्राह्मणान्स्वस्तिवाच्यच।प्रद
क्षिणंगिरेःकृत्वाप्रययौद्वारकांप्रति।तामभिद्रुत्यकौंतेयःप्रसह्यारोपयद्रथं।सुभद्रांचारुसर्व्वांगींकाम
बाणप्रपीडितः।ततःसपुरुषव्याघ्रस्तामादायशुचिस्मितां।रथेनकांचनांगेनप्रययौस्वपुरंप्रति।ह्रियमा ३११
णांतुतांदृष्ट्वासुभद्रांसैनिकाजनाः।विक्रोशंतोऽद्रवन्सर्व्वेद्वारकामभितःपुरीं।तेसमासाद्यसहिताःसुधर्मा
मभितःसभां।सभापालस्यतत्सर्व्वमाचख्युःपार्थविक्रमं।तेषांश्रुत्वासभापालोभेरीं‌सान्नाहिकींततः।समा
जघ्नेमहाघोषांजांबूनदपरिष्कृतां।क्षुब्धास्तेनाथशब्देनभोजवृष्ण्यंधकास्तदा।अन्नपानमपास्याथस

मापेतुःसमन्ततः।तत्रजांबूनदांगानिस्पर्द्ध्यास्तरणवन्तिच।मणिविद्रुमचित्राणिज्वलिताग्निप्रभाणिच।भे
जिरेपुरुषव्याघ्रावृष्ण्यंधकमहारथाः।सिंहासनानिशतशोधिष्ण्यानीवहुताशनाः।तेषांसमुपविष्टानां
देवानामिवसन्नये।आचख्यौचेष्टितंजिष्णोःसभापालःसहानुगः।तच्छ्रुत्वावृष्णिवीरास्तेमदसंरक्तलो
चनाः।अमृष्यमाणाःपार्थस्यसमुत्पेतुरहंकृताः।योजयध्वंरथानाशुप्रासानाहरतेतिच।धनूंषिचमहार्हा
णिकवचानिबृहन्तिच।सूतानुच्चुक्रुशुःकेचिद्रथान्योजयतेतिच।स्वयंचतुरगान्केचिन्न्युंजन्हेमभूषिता
न्।रथेष्वानीयमानेषुकवचेषुध्वजेषुच।अभिक्रंदेनृवीराणांतदासीत्तुमुलंमहत्।वनमालीततःक्षीबः
कैलासशिखरोपमः।नीलवासामदोत्सिक्तइदंवचनमब्रवीत्।किमिदंकुरुथाप्रज्ञास्तूष्णींभूतेजना
र्द्दने।अस्यभावमविज्ञायसंक्रुद्धामोघगर्ज्जिताः।एषतावदभिप्रायमाख्यातुस्वंमहामतिः।यदस्यरुचि
तंकर्तुंतत्कुरुध्वमतंद्रिताः।ततस्तेतद्वचःश्रुत्वाग्राह्यरूपंहलायुधात्।तूष्णींभूतास्ततःसर्वेसाधुसाध्वि
तिचाब्रुवन्।समंवचोनिशम्यैवबलदेवस्यधीमतः।पुनरेवसभामध्येसर्वेतेसमुपाविशत्।ततोब्रवीद्वासु
देवंवचोरामःपरंतपः।किमवागुपविष्टोसिप्रेक्षमाणोजनार्द्दनः।सत्कृतस्त्वत्कृतेपार्थःसर्वैरस्माभिरच्यु

आ०प०
३१२
तानवसोर्हतितांप्राप्तांदुर्बुद्धिःकुलपांसनः।कोहितत्रैवभुक्त्वान्नंभाजनंभेत्तुमर्हति।मन्यमानःकुलेजातं
मात्मानंपुरुषःक्वचित।इछन्नेवहिसंबंधंकृतंपूर्वंचमानयन्।कोहिनामभवेन्नार्थीसाहसेनसमाचरे
त्।सोवमन्यतथास्माकमनादृत्यचकेशवं।प्रसह्यहृतवानद्यसुभद्रांमृत्युमात्मनः।कथंहिशिरसोमध्येकृ
तन्तेनपदंममा।मर्षयिष्यामिगोविंदपादस्पर्शमिवोरगः।अद्यनिष्कौरवामेकःकरिष्यामिवसुंधरां।नहि
मेमर्षणीयोयमर्जुनस्यव्यतिक्रमः।तंतथागर्जमानंतुमेघदुंदुभिनिस्वनं।अन्वपद्यंततेसर्वेभोजवृष्ण्यंध
कास्तथा इत्यादिपर्वणिसुभद्राहरणे वैशं उक्तवंतोयथावीर्यमसकृत्सर्ववृष्णयः।ततो
ब्रवीद्वासुदेवोवाक्यंधर्म्मार्थसंयुतं।नावमानंकुलस्यास्यगुडाकेशःप्रयुक्तवान्।सम्मानोभ्यधिकस्तेन
प्रयुक्तोयमसंशयः।अर्थलुब्धान्नवःपार्थोमन्यतेसात्वतान्सदा।स्वयंवरमनाधृष्यममन्यतेचापिपांडवः।
प्रदानमपिकन्यायाःपशुवत्कोनुमन्यते।विक्रयंचाप्यपत्यस्यकःकुर्यात्पुरुषोभुवि।एतान्दोषांस्तुकौंतेयो
दृष्टवानितिमेमतिः।अतःप्रसह्यहृतवान्कन्यांधर्म्मेणपांडवः।उचितश्चैवसंबंधःसुभद्राचयशस्विनी।
एषचापीदृशःपार्थःप्रसह्यहृतवानिति।भरतस्यान्वयेजातंशांतनोश्चयशस्विनः।कुन्तिभोजात्मजापुत्रं ३१२

कोनुमृषेतनार्ज्जुनं।नचपश्यामियःपार्थंविजयेतरणेबलात्।अपिसर्व्वेषुलोकेषुसंद्रुतेषुमारिषास
चनामरथस्तादृक्मदीयास्तेचवाजिनः।योद्धापार्थश्चशीघ्रास्त्रःकोनुतेनसमोभवेत्।तमभिद्रुत्यसां
त्वेनपरमेणधनंजयं।निवर्त्तयतसंहृष्टाममैषापरमामतिः।यदिनिर्ज्जित्यवःपार्थोबलाद्गच्छेत्स्वकंपुरं।
प्रणष्टमेवद्यैवयशःसद्योनतुसान्त्वेपराजयः।तच्छ्रुत्वावासुदेवस्यतथाचक्रुर्ज्जनाधिपा।निवृत्तश्चार्ज्जुनस्तत्रविवा
हंकृतवान्प्रभुः।उषित्वातत्रकौन्तेयःसंवत्सरपराःक्षपाः।विहृत्यचयथाकामंपूजितोवृष्णिनंदनैः।पुष्करेतु
ततःशेषंकालंवर्त्तितवान्प्रभुः।पूर्णेतुद्वादशेवर्षेखांडवप्रस्थमागतः।अभ्यागम्यचराजानंनियमेनस
माहितः।अभ्यर्च्यब्राह्मणान्पार्थोद्रौपदीमभिजग्मिवान्।तंद्रौपदीप्रत्युवाचविनयात्कुरुनंदनं।तत्रैवग
च्छकौन्तेययत्रसासात्वतात्मजा।सुबद्धस्यापिभारस्यपूर्व्वबंधःश्लथायते।तथाबहुविधंकृत्वाविलपंतींध
नंजयः।सान्त्वयामासभूयश्चक्षमयामासचासकृत्।सुभद्रांत्वरमाणश्चरक्तकौशेयवासिनीं।पार्थःप्र
स्थापयामासकृत्वागोपालिकावपुः।साधिकंतेनरूपेणशोभमानायशस्विनी।भवनंश्रेष्ठमासाद्यवीर
पत्नीवरांगना।ववंदेपृथुताम्राक्षीपृथांभद्रायशस्विनी।तांकुन्तीचारुसर्व्वांगीमुपाजिघ्रतमूर्द्धनि।प्रीत्या

परमयायुक्ता आशीभिर्युयुजे तु तां। ततोभिगम्य त्वरिता पूर्णेंदुसदृशानना। ववंदे द्रौपदी भद्रा प्रेष्याह
मिति चाब्रवीत्। प्रत्युत्थाय तदा कृष्णा स्वसारं माधवस्य ह। परिष्वज्यावदत्प्रीत्या निःसपत्नोस्तु ते पतिः। त
थैव मुदिता भद्रा तामुवाचैवमस्त्विति। ततस्ते हृष्टमनसः पांडवेया महारथाः। कुंती च परमप्रीता बभूव
जनमेजय। श्रुत्वानु पुंडरीकाक्षः संप्राप्तं स्वपुरोत्तमं। अर्जुनं पांडवश्रेष्ठमिंद्रप्रस्थगतं तदा। आजगाम विशु
द्धात्मा सह रामेण केशवः। वृष्ण्यंधकमहामात्यैः सह वीरैर्महारथैः। भ्रातृभिश्च कुमारैश्च योधैश्च बहु
भिर्वृतः। सैन्येन महता शौरिरभिगुप्तः परंतपः। तत्र दानपतिर्धीमानाजगाम महायशाः। अक्रूरो वृष्णि
वीराणां सेनापतिररिंदमः। अनाधृष्टिर्महातेजा उद्धवश्च महायशाः। साक्षाद्बृहस्पतेः शिष्यो महाबुद्धि
र्महामनाः। सत्यकः सात्यकिश्चैव कृतवर्मा च सात्वतः। प्रद्युम्नश्चैव शाम्बश्च निशठः शंकुरेव च। चारु ३१३
देष्णश्च विक्रांतो झिल्ली विपृथुरेव च। सारणश्च महाबाहुर्गदश्च विदुषां वरः। एते चान्ये च बहवो वृष्णिभोजां
धकास्तथा। आजग्मुः खांडवप्रस्थमादाय हरणं बहु। ततो युधिष्ठिरो राजा श्रुत्वा माधवमागतं। प्रतिग्र
हार्थं कृष्णस्य यमौ प्रस्थापयत्तदा। ताभ्यां प्रतिगृहीतं तु वृष्णिचक्रं महर्द्धिमत्। विवेश खांडवप्रस्थं पता

काष्ठजन्त्रोभितां संमृष्टसिक्तपंथानं पुष्पप्रकरशोभितं। चंदनस्य रसैः शीतैः पुण्यगंधैर्निषेवितां द
ह्यतागुरुणा चैव देशे देशे सुगंधिना। हृष्टपुष्टजनाकीर्णां वणिग्भिरुपशोभितां। प्रतिपेदे महाबाहुः सह
रामेण केशवः। वृष्ण्यंधकैस्तथा भोजैः समेतः पुरुषोत्तमः। संपूज्यमानः पौरैश्च ब्राह्मणैश्च सहस्रशः।
विवेश भवनं राज्ञः पुरंदरगृहोपमं। युधिष्ठिरस्तु रामेण समागच्छद्यथाविधि। मूर्ध्नि केशवमाघ्राय बाहुभ्यां
परिषस्वजे। तं प्रीयमाणो गोविंदो विनयेनाभ्यपूजयत्। भीमं च पुरुषव्याघ्रं विधिवत्प्रत्यपूजयत्। तांश्च वृ
ष्ण्यंधकश्रेष्ठान् कुंतीपुत्रो युधिष्ठिरः। प्रतिजग्राह सत्कारैर्यथाविधि यथागतं। गुरुवत्पूजयामास कां
श्चित्कांश्चिद्वयस्यवत्। कांश्चिदभ्यवदत्प्रेम्णा कैश्चिदप्यभिवादितः। तेषां ददौ हृषीकेशो जन्यार्थे धन
मुत्तमं। हरणं वै सुभद्राया ज्ञातिदेयं महायशाः। रथानां कांचनांगानां किंकिणीजालमालिनां। चतुर्यु
जामुपेतानां सूतैः कुशलशिक्षितैः। सहस्रं प्रददौ कृष्णो गवामयुतमेव च। श्रीमन्माथुरदेश्यानां दोग्ध्री
णां पुण्यवर्चसां। वडवानां च शुद्धानां चंद्रांशुसमवर्चसां। ददौ जनार्दनः प्रीत्या सहस्रं हेमभूषणं। तथैवा
श्वतरीणां च दांतानां वातरंहसां। शतान्यंजनकेशीनां श्वेतानां पंच पंच च। स्नानपानोत्सवे चैव प्रयु

श्री०प०
३१५

रूपं वयसान्वितं। स्त्रीणां सहस्रं गौरीणां सुवेशानां सुवर्चसां। सुवर्णनिष्ककंठीनामरोगाणां स्वलंकृतां। परि
चर्यासु दक्षाणां प्रददौ पुष्करेक्षणः। पृष्ठ्यानामपि चाश्वानां बाह्लिकानां जनार्दनः। ददौ शतसहस्रा
ख्यं कन्याधनमनुत्तमं। कृताकृतस्य मुख्यस्य कनकस्याग्निवर्चसः। मनुष्यभारान्दाशार्हो ददौ दश जना
र्दनः। गजानां तु प्रभिन्नानां त्रिधा प्रस्रवतां मदं। गिरिकूटनिकाशानां समरेष्वनिवर्तिनां। क्लृप्तानां प
टुघंटानां चारूणां हेममालिनां। हस्त्यारोहैरुपेतानां सहस्रं साहसप्रियः। रामः पाणिग्रहणिकं ददौ पा
र्थाय लांगली। प्रीयमाणो हलधरः संबंधप्रतिमानयन्। स महाधनरत्नौघो वस्त्रकंबलफेनवान्। मह
गजमहाग्राहः पताकाशैवलाकुलः। पांडुसागरमाविद्धः प्रविवेश महानदः। पूर्णमापूरयंस्तेषां द्विषच्छो
कावहोऽभवत्। प्रतिजग्राह तत्सर्वं धर्मराजो युधिष्ठिरः। पूजयामास तांश्चैव वृष्ण्यंधकमहारथान्। ते स ३१५
मेता महात्मानः कुरुवृष्ण्यंधकोत्तमाः। विजह्रुरमरावासे नराः सुकृतिनो यथा। तत्र तत्र महानादैरुत्कृ
ष्टतलनादितैः। यथायोगं यथाप्रीति विजह्रुः कुरुवृष्णयः। एवमुत्तमवीर्यास्ते विहृत्य दिवसान्बहून्। पू
जिताः कुरुभिर्जग्मुः पुनर्द्वारवतीं प्रति। रामं पुरस्कृत्य ययुर्वृष्ण्यंधकमहारथाः। रत्नान्यादाय शुभ्राणि

दत्तानिकुरुसत्तमैः।वासुदेवस्तुपार्थेनतत्रैवसहभारत।उवासनगरेरम्येशक्रप्रस्थेमहात्मना।व्यच
रद्यमुनातीरेमृगयांसमहायशाः।मृगान्विध्यन्वराहांश्चरेमेसार्द्धंकिरीटिना।ततःसुभद्रासौभद्रंकेश
वस्यप्रियास्वसा।जयंतमिवपौलोमीख्यातिमंतमजीजनत्।दीर्घबाहुंमहोरस्कंवृषभाक्षमरिंदमं।
सुभद्रासुषुवेवीरमभिमन्युंनरर्षभं।अभीश्चमन्युमांश्चैवततस्तमरिमर्दनं।अभिमन्युमितिप्राहुरा
र्जुनिंपुरुषर्षभं।सरसत्वस्यामतिरथःसंबभूवधनंजयात्।मखेनिर्मथ्यमानेनेवशमीगर्भाद्धुताशनः।
यस्मिन्जातेमहातेजाःकुंतीपुत्रोयुधिष्ठिरः।अयुतंगाद्विजातिभ्यःप्रादान्निष्कांश्चभारत।दयितो
वासुदेवस्यबाल्यात्प्रभृतिचाभवत्।पितृणांचैवसर्वेषांप्रजानामिवचंद्रमाः।जन्मप्रभृतिकृष्णश्चचक्रे
तस्यक्रियाःशुभाः।सचापिववृधेबालःशुक्लपक्षेयथाशशी।चतुष्पादंदशविधंधनुर्वेदमरिंदमः।
अर्जुनाद्वेदवेदज्ञःसकलंदिव्यमानुषं।विज्ञानेष्वपिचास्त्राणांसौष्ठवेचमहाबलः।क्रियास्वपिचसर्वा
सुविशेषानभ्यशिक्षयत्।आगमेचप्रयोगेचचक्रेतुल्यमिवात्मना।तुतोषपुत्रंसौभद्रंप्रेक्षमाणोधनं
जयः।सर्वसंहननोपेतंसर्वलक्षणलक्षितं।दुर्द्धर्षमृषभस्कंधंव्यात्ताननमिवोरगं।सिंहदर्पमहे

आ०प०
३१५

घासंमत्तमातंगविक्रमं।मेघदुंदुभिनिर्घोषंपूर्णचंद्रनिभाननं।कृष्णस्यसदृशंशौर्येवीर्येरूपेतथाकृतौ।ददृ
र्शपुत्रंबीभत्सुर्मघवानिवतंयथा।पांचाल्यपितुपंचभ्यःपतिभ्यःशुभलक्षणा।लेभेपंचसुतान्वीरान्श्रेष्टान्पं
चाचलानिव।युधिष्ठिरात्प्रतिविंध्यंसुतसोमंवृकोदरात्।अर्जुनाच्छ्रुतकर्माणंशतानीकंचनाकुलिं।सहदे
वाच्छ्रुतसेनमेतान्पंचमहारथान्।पांचालीसुषुवेवीरानादित्यानदितिर्यथा।शास्त्रतःप्रतिविंध्यंतमूचुर्वि
प्रायुधिष्ठिरं।परप्रहरणज्ञानेप्रतिविंध्योभवत्वयं।सुतेसोमसहस्रेतुसोमार्कसमतेजसं।सुतसोमंमहे
ष्वासंसुषुवेभीमसेनतः।श्रुतंकर्ममहत्कृत्वानिवृत्तेनकिरीटिना।जातःपुत्रस्तवेत्येवंश्रुतकर्माततो
भवत्।शतानीकस्यराजर्षेःकौरवस्यमहात्मनः।चक्रेपुत्रंसनामानंनकुलःकीर्तिवर्द्धनं।ततस्त्वजीजन
त्कृष्णानक्षत्रेवह्निदैवते।सहदेवात्सुतंतस्माच्छ्रुतसेनेतियंविदुः।एकवर्षांतरास्त्वेवंद्रौपदेयायशस्वि
नः।अन्वजायंतराजेंद्रपरस्परहितैषिणः।जातकर्माण्यानुपूर्व्याच्चूडोपनयनानिच।चकारविधिवद्धौम्य
स्तेषांभरतसत्तम।कृत्वाचवेदाध्ययनंततःसुचरितव्रताः।जगृहुःसर्वमिष्वस्त्रमर्जुनाद्दिव्यमानुषं।दिव्य
गर्भोपमैःपुत्रैःव्यूढोरस्कैर्महारथैः।अन्विताराजशार्दूलपांडवामुदमाप्नुवन्   इत्यादिपर्वणिसुभद्रा ३१५

हरणंसमाप्तम् वैशं इंद्रप्रस्थेवसन्तस्तेजघ्नुरन्यान्नराधिपान्।शासनाद्धृतराष्ट्रस्यराज्ञः
शान्तनवस्यच।आश्रित्यधर्म्मराजानंसर्वलोकोवसत्सुखं।पुण्यपुण्यकृतंकर्माणंस्वदेहमिवदेहिनः।सस
मंधर्मकामार्थान्सिषेवेभरतर्षभः।त्रीनिवात्मसमान्बंधून्बंधूनीतिमानिवमानयन्।तेषांसमविभक्तानांक्षि
तौदेहवतामिव।बभौधर्म्मार्थकामानांचतुर्थइवपार्थिवः।अध्येतारंपरंवेदान्प्रयोक्तारंमहाध्वरे।रक्षिता
रंशुभाल्लोकांल्लेभिरेतंजनाधिपं।अधिष्ठानवतीलक्ष्मीःपरायणवतीमतिः।वर्धमानोखिलोधर्मस्तेना
सीत्पृथिवीक्षिता।भ्रातृभिःसहितोराजाचतुर्भिरधिकंबभौ।प्रयुज्यमानैर्विततोवेदैरिवमहाध्वरः।
तंतुधौम्यादयोविप्राःपरिवार्य्योपतस्थिरे।बृहस्पतिसमामुख्याःप्रजापतिमिवामराः।धर्म्मराजे
ह्यतिप्रीत्यापूर्णचंद्रइवामले।प्रजानांरेमिरेतुल्यंनेत्राणिहृदयानिच।नतुकेवलदैवेनप्रजाभावेनरेमि
रे।यद्बभूवमनःकांतंकर्म्मणासचकारतत्।नह्ययुक्तंनचासत्यंनासह्यंनचवाप्रियं।भाषितंचारुभाष
स्यजज्ञेपार्थस्यधीमतः।सहिसर्व्वस्यलोकस्यहितमात्मनएवच।चिकीर्षन्सुमहातेजारेमेभरतसत्त
म।तथातुमुदिताःसर्व्वेपांडवाविगतज्वराः।अवसन्पृथिवीपालांस्तापयन्तःस्वतेजसा।ततःकति

आ०प०
३१६

पयाहस्पबीभत्सुः कृष्णमब्रवीत्।उष्णानिकृष्णवर्त्तंतेगच्छामोयमुनांप्रति।सुहृज्जनवृतौतत्रविहृत्य
मधुसूदन।सायाह्नेपुनरेष्यावोरोचतांतेजनार्दन वासुदेवउ कुंतीमातर्ममाप्येतद्रोचतेयद्वयंज
ले।सुहृज्जनवृताःपार्थविहरेमयथासुखम् वैशं आमंत्र्यतौधर्मराजमनुज्ञाप्यचभारत।जग्म
तुःपार्थगोविंदौसुहृज्जनवृतौततः।विहारदेशंसंप्राप्यनानाद्रुममनुत्तमं।गृहैरुच्चावचैर्युक्तंपुरंद
रपुरोपमं।भक्ष्यैर्भोज्यैश्चपेयैश्चरसवद्भिर्महाधनैः।माल्यैश्चविविधैर्गंधैर्युक्तंवार्ष्णेयपार्थयोः।विवे
शांतःपुरंतूर्णंरत्नैरुच्चावचैःशुभैः।यथोपजोषंसर्वश्चजनश्चिक्रीडभारत।स्त्रियश्चविपुलश्रोण्यश्चा
रुपीनपयोधराः।मदस्खलितगामिन्यश्चिक्रीडुर्वामलोचनाः।वनेकाश्चिज्जलेकाश्चित्काश्चिद्वेश्मसु
चांगनाः।यथादेशंयथाप्रीतिश्चिक्रीडुःकृष्णपार्थयोः।द्रौपदीचसुभद्राचवासांस्याभरणानिचाप्रा ३१६
यच्छतांमहार्हाणिस्त्रीणांतेस्ममदोत्कटे।काश्चित्प्रहृष्टाननृतुश्चुक्रुशुश्चतथापराः।जहसुश्चपरानार्यः
पपुश्चान्यावरासवं।रुरुधुश्चापरास्तत्रप्रजघ्नुश्चपरस्परं।मंत्रयामासुरन्याश्चरहस्यानिपरस्परं।वे
णुवीणामृदंगानांमनोज्ञानांचसर्वशः।शब्देनपूर्यतेहस्मतद्वनंसुमहर्द्धिमत्।तस्मिंस्तथावर्त्तमा

नेकुरुदाशार्हनंदनौ।समीपेजग्मतुःकंचिदुद्देशंसुमनोरमं।तत्रगत्वामहात्मानौकृष्णौपरपुरंज
यौ।महार्हासनयोराजंस्ततस्तौसन्निषीदतुः।तत्रपूर्वव्यतीतानिविक्रांतानीतराणिच।बहूनिकथयि
त्वातौरेमातेपार्थमाधवौ।तत्रोपविष्टौमुदितौनाकपृष्ठेश्विनाविव।अभ्यागच्छत्तदाविप्रोवासुदेवधनं
जयौ।बृहच्छालप्रतीकाशःप्रतप्तकनकप्रभः।हरिपिंगोज्वलश्मश्रुःप्रमाणेनायामतःसमः।तरुणादि
त्यसंकाशःचीरवासाजटाधरः।पद्मपत्राननःपिंगस्तेजसाप्रज्वलन्निव।उपसृष्टंतुतंकृष्णौभ्राजमानं
द्विजोत्तमं।अर्जुनोवासुदेवश्चतूर्णमुत्पत्यतस्थतुः इत्यादिपर्वणिखांडवदाहे वैशं ॥
सोब्रवीदर्जुनंचैववासुदेवंचसात्वतं।लोकप्रवीरौतिष्ठंतौखांडवस्यसमीपतः।ब्राह्मणोबहुभोक्ता
स्मिभुंजेपरिमितंसदा।भिक्षेवार्ष्णेयपार्थौवामेकांतृप्तिंप्रयच्छतां।एवमुक्तौतमब्रूतांततस्तौकृष्णपां
डवौ।केनान्नेनभवान्तृप्येत्तस्यान्नस्ययतावहे।एवमुक्तःसभगवानब्रवीत्तावुभौततः।भाषमाणौ
तदावीरौकिमन्नंक्रियतामिति ब्राह्मणउ नाहमन्नंबुभुक्षेवैपावकंमांनिबोधतं।यदन्नम
नुरूपंमेतद्युवांसंप्रयच्छतं।इदमिंद्रःसदादावंखांडवंपरिरक्षति।नचशक्नोम्यहंदग्धुंरक्ष्यमाणं

महात्मना।वसत्यत्रसखातस्यतक्षकःपन्नगःसदा।सगणस्तत्कृतेदावंपरिरक्षतिवज्रभृत्।तत्रभूता
न्यनेकानिरक्षंतेस्यप्रसंगतः।तान्दिधक्षुर्न्नशक्नोमिदग्धुंशक्रस्यतेजसा।समांप्रज्वलितंदृष्ट्वामेघांभोभिः
प्रवर्षति।ततोदग्धुन्नशक्नोमिदिधक्षुर्द्दावमीप्सितं।सयुवाभ्यांसहायाभ्यामस्त्रविद्भ्यांसमागतः।दहेयं
खांडवंदावमेतदन्नंकृतंमया।युवांह्युदकधारास्ताभूतानिचसमंततः।उत्तमास्त्रविदौसम्यक्सर्वतो
वारयिष्यथ॥ जनमेजयउ॰ किमर्थंभगवानग्निःखांडवंदग्धुमिच्छति।रक्ष्यमाणंमहेंद्रेणनाना
सत्वसमायुतं।नह्येतत्कारणंब्रह्मन्नल्पंसंप्रतिभातिमे।यद्ददाहसुसंक्रुद्धःखांडवंहव्यवाहनः।एतद्वि
स्तरशोब्रह्मन्श्रोतुमिच्छामितत्वतः।खांडवस्यपुरादाहोयथासमभवन्मुने॥ वैशं॰ हंततेकथयि
ष्यामिपौराणीमृषिसंस्तुतां।कथामिमांनरश्रेष्ठखांडवस्यविनाशिनीं।पौराणःश्रूयतेतातराजाहरिह ३२७
योपमः।श्वेतकिर्न्नामविख्यातोबलविक्रमसंयुतः।यज्वादानपतिर्द्धीमान्यथानान्योस्तिकश्चन।ईजेच
समहायज्ञैःक्रतुभिश्चाप्तदक्षिणैः।तस्यनान्याभवद्बुद्धिर्द्दिवसेदिवसेनृप।सत्रेक्रियासमारंभेदानेषुवि
विधेषुच।तस्यैवंवर्त्तमानस्यकदाचित्कालपर्य्यये।सत्रमाहर्त्तुकामस्यसंवत्सरशतंकिल।ऋत्विजान्न

न्यपद्यन्त समाहर्त्तुं महात्मनः। स तु राजा करोद्यत्नं महान्तं ससुहृज्जनः। प्रणिपातेन सांत्वेन दानेन च महा
यशाः। ऋत्विजोनुनयामास भूयो भूयस्त्वतंद्रितः। ते चास्य तमभिप्रायं न चक्रुरमितौजसः। स चाश्रम
स्थान्राजर्षिस्तानुवाच रुषान्वितः। यद्यहं पतितो विप्राः शुश्रूषायां च न स्थितः। आशु त्याज्योस्मि यु
ष्माभिर्ब्राह्मणैश्च जुगुप्सितः। तन्नार्हत क्रतुश्रद्धां व्याघातयितुमुत्तमाः। अस्थाने वा परित्यागं कर्त्तुं
मे द्विजसत्तमाः। प्रपन्न एव वो विप्राः प्रसादं कर्त्तुमर्हथ। सांत्वदानादिभिर्वाक्यैस्तत्वतः कार्यवत्तया।
प्रसादयित्वा वक्ष्यामि यत्नः कार्यं द्विजोत्तमाः। अथवाहं परित्यक्तो भवद्भिर्द्वेषकारणात्। ऋत्विजोन्या
न्गमिष्यामि याजनार्थं द्विजोत्तमाः। एतावदुक्त्वा वचनं विरराम स पार्थिवः। यदा न शेकू राजानं याज
नार्थं परंतपं। ततस्ते याजकाः क्रुद्धास्तमूचुर्नृपसत्तमं। तव कर्म्माण्यजस्रं वै वर्त्तन्ते पार्थिवोत्तम। ततो
वयं परिश्रांताः सततं कर्म्मवादिनः। श्रमादस्मात्परिश्रान्तान् स त्वं न स्त्यक्तुमर्हसि। बुद्धिमोहं समास्था
य त्वरासंभावितोनघ। गच्छ रुद्रसकाशं त्वं स हि त्वां याजयिष्यति। साधिक्षेपं वचः श्रुत्वा संक्रुद्धः श्वेतकि
र्नृपः॥ कैलाशं पर्वतं गत्वा तप उग्रं समास्थितः। आराधयन्महादेवं नियतः शंशितव्रतः। उपवासपरो

श्री०पु० जन्नृदीर्घकालमतिष्ठत।कदाचिद्द्वादशेकालेकदाचिदपिषोडशे।आहारमकरोद्राजामूलानिचफला
३१८ निच।ऊर्द्धबाहुस्त्वनिमिषस्तिष्ठन्स्थाणुरिवाचलः॥षण्मासानभवद्राजाश्वेतकिःसुसमाहितः।तंत
थानृपशार्दूलतप्यमानंमहत्तपः।शंकरःपरमप्रीतोदर्शयामासभारत।प्रीतोस्मिनृपशार्दूलतप
सातेपरंतप।वरंवृणीष्वभद्रंतेयत्त्वमिच्छसिपार्थिव।एतच्छ्रुत्वातुवचनंस्मातेनप्रभाषितं।रुद्रस्या
मिततेजसः।प्रणिपत्यमहात्मानंराजर्षिःप्रत्यभाषत।यदिमेभगवान्प्रीतःसर्वलोकनमस्कृतः।स्व
यंमांदेवदेवेशयाजयस्वसुरेश्वर।एतच्छ्रुत्वातुवचनंराज्ञातेनप्रभाषितं।उवाचभगवान्प्रीतःस्मित
पूर्वमिदंवचः।नास्माकमेतद्विषयेवर्त्ततेयाजनंप्रति।त्वयाचसुमहत्तप्तंतपोराजन्वरार्थिना।याजयि
ष्यामिराजंस्त्वांसमयेनपरंतप रुद्रउवाच समाद्वादशराजेंद्रब्रह्मचारीसमाहितः।सततंत्वा ३१८
ज्यधाराभिर्यदितर्प्पयसेनलं।कामंप्रार्थयसेयंत्वंमत्तःप्राप्स्यसितंनृप।एवमुक्तस्तुरुद्रेणश्वेतकि
र्मनुजाधिपः।तथाचकारतत्सर्वंयथोक्तंशूलपाणिना।पूर्णेतुद्वादशेवर्षेपुनरायान्महेश्वरः।दृष्ट्वै
वचसराजानंशंकरोलोकभावनः।उवाचपरमप्रीतःश्वेतकिंनृपसत्तमं।तोषितोहंनृपश्रेष्ठत्वयेह।

द्येनकर्म्मणा। याजनंब्राह्मणानांतुविधिदृष्टंपरंतप। अतोहंत्वांस्वयन्नाहंयाजयामिपरंतपाममांश
स्तुक्षितितलेमहाभागोद्विजोत्तमः। दुर्व्वासाइतिविख्यातःसहित्वांयाजयिष्यति। मन्नियोगान्महातेजाः
संभाराःसंभ्रियंतुते। एतछ्रुत्वातुवचनंरुद्रेणसमुदाहृतं। स्वपुरंपुनरागम्यसंभारान्पुनरार्जयत्। ततः
संभृतसंभारोभूयोरुद्रमुपागमत्। संभृताममसंभाराःसर्व्वोपकरणानिच। त्वत्प्रसादान्महादेवश्वोमे
दीक्षाभवेदिति। एतछ्रुत्वातुवचनंतस्यराज्ञोमहात्मनः। दुर्व्वाससंसमाहूयरुद्रोवचनमब्रवीत्। एषराजा
महाभागःश्वेतकिर्द्विजसत्तम। एतंयाजयविप्रेंद्रमन्नियोगेनभूमिपं। वाढमित्येववचनंरुद्रंऋषिरुवा
चह। ततःसत्रंसमभवत्तस्यराज्ञोमहात्मनः। यथाकामंयथोक्तंचसत्रंसुवकुदक्षिणं। तस्मिन्परिसमाप्ते
तुराज्ञःसत्रेमहात्मनः। दुर्व्वाससाभ्यनुज्ञाताविप्रतस्थुःस्मयाजकाः। येतत्रदीक्षिताःसर्व्वेसदस्याश्चमहौ
जसः। सोपिराजन्महाभागःस्वपुरंप्रविशत्तदा। ततोभगवतोवन्हेर्व्विकारःसमजायत। तेजसाविप्रहीण
श्चग्लानिश्चैनंसमाविशत्। सलक्षयित्वाचात्मानंतेजोहीनंहुताशनः। जगामसदनंपुण्यंब्रह्मणोलो
कपूजितः। तत्रब्रह्माणमासीनमिदंवचनमब्रवीत्। तेजसाविप्रहीणोस्मिवलेनचजगत्पते। इछेयं

आ०प०
३२९

त्वत्प्रसादेनआत्मनःप्रकृतिंस्थिरां।एतच्छ्रुत्वाकुतवहाद्भगवान्सर्वलोककृत्।हव्यवाहमिदंवाक्यमुवाच
प्रहसन्निव।त्वयाद्वादशवर्षाणिवसोर्धाराकुतंहविः।उपयुक्तंमहाभागतेनत्वांग्लानिराविशत्।तेज
साविप्रहीणत्वात्सहसाहव्यवाहनः।मागमस्त्वंव्यथांवह्नेप्रकृतिस्थोभविष्यसि।पुरादेवनियोगेनयत्त्व
याभस्मसात्कृतं।आलयंदेवशत्रूणांसुघोरंखांडवंवनं।तत्रसर्वाणिसत्वानिनिवसंतिविभावसो।तेषांत्व
म्मेदसातस्नः प्रकृतिस्थोभविष्यसि।गच्छशीघ्रंप्रदग्धुंत्वंततोमोक्ष्यसिकिल्बिषात्।एतच्छ्रुत्वानुवचनंपर
मेष्ठिमुखाच्युतं।उत्तमंजवमास्थायप्रदुद्रावकुताशनः।आगम्यखांडवंदावमुत्तमंजवमास्थितः।सह
साप्राज्वलद्वह्निःक्रुद्धोवायुसमीरितः।प्रदीप्तंखांडवंदृष्ट्वायेस्युस्तत्रनिवासिनः।परमंयत्नमातिष्ठन्
पावकस्यप्रशांतये।करैस्तुकरिणःशीघ्रंजलमादायसत्वराः।सिषिचुःपावकंक्रुद्धाःशतशोथसह ३२९
स्रशः।बहुशीर्षास्तथानागाःशिरोभिर्जलसन्नतिं।मुमुचुःपावकाभ्यासेसत्वराःक्रोधमूर्छिताः।तथैवा
न्यानिसत्वानिनानाप्रहरणोद्यमैः।विलयंपावकंशीघ्रमनयन्भरतर्षभ।अनेनतुप्रकारेणभूयोभूयश्च
प्रज्वलन्।सप्तकृत्वःप्रशमितःखांडवेहव्यवाहनः इत्यादिपर्वणिखांडवदाहे वैशम ॥

सतुनैराश्यमापन्नस्तदाग्लानिसमन्वितः।पितामहमुपागछत्संक्रुद्धोहव्यवाहनः।तच्चसर्व्वंयथान्यायंब्र
ह्मणेसन्यवेदयत्।उवाचचैनंभगवान्मुहूर्त्तंसविचिन्त्यतु।उपायःपरिदृष्टोमेयथात्वंधक्ष्यसेऽनघ।खांड
वंदावमद्यैवमिषतोस्यशचीपतेः।नरनारायणौयौतौपूर्व्वदेवौविभावसो।संप्राप्तौमानुषेलोकेकार्यार्थं
हिदिवौकसां।अर्जुनंवासुदेवंचयौतौलोकोभिमन्यते।तावेतौसहितावेहिखांडवस्यसमीपतः।तौत्वंया
चस्वसाहाय्येदाहार्थंखांडवस्यच।ततोधक्ष्यसितंदावंरक्षितंत्रिदशैरपि।तौतुसत्वानिसर्व्वाणियत्नतोवा
रयिष्यतः।देवराजंचसहितौतत्रमेनास्तिसंशयः।एतछ्रुत्वातुवचनंत्वरितोहव्यवाहनः।कृष्णपार्थावु
पागम्ययमर्थंत्वभ्यभाषत।तन्तेकथितवानस्मिपूर्व्वमेवनृपोत्तमः।तछ्रुत्वावचनंत्वग्नेर्व्वीभत्सुर्ज्जातवेद
सं।अब्रवीन्नृपशार्दूलतत्कालसदृशंवचः।दिधक्षुंखांडवंदावमकामस्यशतक्रतोः॥ अर्जुनउ ॥
उत्तमास्त्राणिमेसन्तिदिव्यानिचबहूनिच।यैरहंशक्नुयांयोद्धुमपिवज्रधराण्बहून्।धनुर्म्मेनास्तिभगवान्
बाहुवीर्येणसम्मितं।कुर्व्वतःसमरेयत्नंवेगंयद्विषहेन्मम।शरैश्चमेर्थोबहुभिरक्षयैःक्षिप्रमस्यतः।न
हिवोढुंरथःशक्तःशरान्ममयथेप्सितान्।अश्वांश्चदिव्यानिछेयंपांडुरान्वातरंहसः।रथंचमेघनिर्घोषं

आ०प०
३२०

सूर्यप्रतिमतेजसं। तथा कृष्णस्य वीर्येण नायुधं विद्यते समं। येन नागान्पिशाचांश्च निहन्यान्माधवो रणे। उ
पायं कर्मसिद्धौ च भगवन्वक्तुमर्हसि। निवारयेयं येनेन्द्रं वर्षमाणं महावने। पौरुषेण तु यत्कार्यं तत्कर्तारौ स्व च
पावकाकरणानि समर्थानि भगवन्दातुमर्हसि   इत्यादिपर्वणि खांडवदाहे   वैशं   एवमु
क्तः स भगवान्धूमकेतुर्हुताशनः। चिन्तयामास वरुणं लोकपालं दिदृक्षया। आदित्यमुदके देवं निवसंतं
जलेश्वरं। स च तच्चिन्तितं ज्ञात्वा दर्शयामास पावकं। तमब्रवीद्धूमकेतुः प्रतिगृह्य जलेश्वरं। चतुर्थं लोकपाला
नां देवदेवं सनातनं। सोमेन राज्ञा यद्दत्तं धनुश्चैवेषुधी च ते। तत्प्रयच्छोभयं शीघ्रं रथं च कपिलक्षणं। का
र्यं च सुमहत्पार्थो गांडीवेन करिष्यति। चक्रेण वासुदेवश्च तन्ममाद्य प्रदीयतां। ददानीत्येव वरुणः पावकं
प्रत्यभाषत। तदद्भुतं महावीर्यं यशःकीर्तिविवर्द्धनं। चित्रमुच्चावचैर्वर्णैः सर्वशस्त्रैरनाधृष्यं सर्वशस्त्र ३२०
प्रमाथि च। सर्वायुधमहामात्रं परसैन्यप्रधर्षणं। एकं शतसहस्रेण संमितं राष्ट्रवर्द्धनं। चित्रमुच्चावचैर्व
र्णैः शोभितं श्लक्ष्णमव्रणं। देवदानवगंधर्वैः पूजितं शाश्वतीः समाः। प्रादाच्चैव धनूरत्नमक्षय्यौ च महेषु
धी। रथं च दिव्याश्वयुजं कपिप्रवरकेतनं। उपेतं राजतैरश्वैर्गंधर्वैर्हेममालिभिः। पांडुराभ्रप्रतीकाशैर्म

नोवायुसमैर्ज्जवैःसर्व्वोपकरणैर्युक्तमजय्यंदेवदानवैः।भानुमंतंमहाघोषंसर्व्वरत्नमनोरमं।ससर्ज्जयंसु
तपसाभौमनोभुवनप्रभुः।प्रजापतिरनिर्द्देश्यंयस्यरूपंरवेरिव।यंस्मसोमःसमारुह्यदानवानजयत्प्रभुः
।नवमेघप्रतीकाशंज्वलंतमिवचश्रिया।आश्रितौतंरथश्रेष्ठंशक्रायुधसमावुभौ।तापनीयासुरुचिरा
ध्वजयष्टिरनुत्तमा।तस्यांतुवानरोदिव्यःसिंहशार्दूलकेतनः।दिधक्षन्निवतत्रस्मसंस्थितोमूर्द्ध्निसंस्थितः।
शोभत।ध्वजेभूतानितत्रासन्विविधानिमहांतिच।नादेनरिपुसैन्यानांश्रुत्वासंज्ञाप्रणश्यति।सतंना
नापताकाभिःशोभितंरथसत्तमं।प्रदक्षिणमुपावृत्यदैवतेभ्यःप्रणम्यच।सन्नद्धःकवचीखड्गीबद्धगो
धांगुलित्रकः।आरुरोहतदापार्थोविमानंसुकृतीयथा।तच्चदिव्यंधनुःश्रेष्ठंब्रह्मणानिर्म्मितंपुरा।गां
डीवमुपसंगृह्यबभूवमुदितोर्ज्जुनः।हुताशनंपुरस्कृत्यततस्तदपिवीर्य्यवान्।जग्राहबलमास्थायज्य
यंचयुयुजेधनुः।मौर्व्यांतुयोज्यमानायांबलिनापांडवेनह।येश्रृण्वन्कूजितंतत्रतेषांवैव्यथितंमनः
लब्ध्वारथंधनुश्चैवतथाक्षय्यौमहेषुधी।बभूवकल्यःकौन्तेयःप्रहृष्टःसह्यकर्म्मणि।वज्रनाभंततश्च
क्रंददौकृष्णायपावकः।आग्नेयमस्त्रंदयितंसचकल्योभवत्तदा।अब्रवीत्पावकश्चैवमनेनमधुसूदन।

अमानुषानपिरणेजेष्यसित्वमसंशयं।अनेनतुमनुष्याणांदेवानामपिचाहवे।रक्षःपिशाचदैत्यानांना
आ०प० गानांचाधिकस्तथा।भविष्यसिनसंदेहःप्रवरोपिनिवर्हणे।क्षिप्रंक्षिप्तंरणेचैतत्त्वयामाधवशत्रुषु।
३२१ हत्वाप्रतिहतंसंख्येपाणिमेष्यतितेपुनः।वरुणश्चददौतस्मैगदामशनिनिःस्वनां।दैत्यान्तकरणींघो
राम्नाम्नाकौमोदकींप्रभुः।ततःपावकमब्रूतांप्रहृष्टावर्ज्जुनाच्युतौ।कृतास्त्रौशस्त्रसंपन्नौरथिनौध्व
जिनावपि।कल्पौस्वोभगवन्योद्धुमपिसर्व्वैःसुरासुरैः।किंपुनर्वज्रिणैकेनपन्नगार्थेयुयुत्सुना॥
अर्जुनउ चक्रपाणिर्हृषीकेशोविचरन्युधिवीर्यवान्।चक्रेणभस्मसात्सर्व्वंविसृष्टेनतुवीर्य
वान्।त्रिषुलोकेषुतन्नास्तियन्नकुर्य्याज्जनार्द्दनः।गांडीवंधनुरादायतथाहंप्योमहेषुधी।अहमप्यु
त्सहेलोकान्विजेतुंयुधिपावक।सर्व्वतःपरिवार्य्यैवंदावमेतंमहाप्रभ।कामंसंप्रज्वलाद्यैवकल्पौस्वः ३२१
सहकर्म्मणि।एवमुक्तःसभगवान्दाशार्हेणार्ज्जुनेनच।तैजसंरूपमास्थायदावंदग्धुंप्रचक्रमे।सर्व्व
तःपरिवार्य्याथसप्तार्च्चिर्ज्वलनस्तथा।ददाहखांडवंदावंयुगान्तमिवदर्शयन्।प्रतिगृह्यसमाविश्य
तद्वनंभरतर्षभ।मेघस्तनितनिर्घोषैःसर्व्वभूतान्यकंपयन्।दह्यतस्तस्यचवभौरूपंदावस्यभारत।

मेरोरिवनगेंद्रस्यकीर्णस्यांशुमतोंशुभिः॥ इत्यादिपर्वणिखांडवदाहे वैशं तौरथा
भ्यांरथश्रेष्ठौदावस्योभयतःस्थितौ।दिक्षुसर्वासुभूतानांचक्रातेकदनंमहत्।यत्रयत्रचदृश्यन्तेप्रा
णिनःखांडवालयाः।पलायन्तःप्रवीरौतौदावस्योभयतःस्थितौतत्रतत्राभ्यधावतां।छिद्रंनस्मप्रप
श्यन्तिरथयोराशुचारिणोः।आविद्धावेवदृश्येतेरथिनौतौरथोत्तमौ।खांडवेदह्यमानेतुभूतानिशत
संघशः।उत्पेतुर्भैरवान्नादान्विनदन्तःसमन्ततः।दग्धैकदेशाबहवोनिष्टप्ताश्चतथापरे।स्फुटिताक्षावि
शीर्णाश्चविप्लुताश्चसहस्रशः।समालिंग्यसुतानन्येपितृन्भ्रातृनथापरे।त्यक्तुंनशेकुःस्नेहेनतत्रै
वनिधनंगताः।संदष्टदशनाश्चान्येसमुत्पेतुरनेकशः।ततस्तेतीवघूर्णन्तःपुनरग्नौप्रपेदिरे।दग्धपक्षा
क्षिचरणाविचेष्टन्तोमहीतले।तत्रतत्रस्मदृश्यन्तेविनश्यन्तःशरीरिणः।जलाशयेषुतप्तेषुक्वाथ्यमानेषु
वह्निना।गतसत्वाःस्मदृश्यन्तेकूर्ममत्स्याःसमन्ततः।शरीरैरपरैर्दीप्तैर्देहवन्तइवाग्नयः।अदृश्यन्तव
नेतत्रप्राणिनःप्राणसंक्षये।कांश्चिदुत्पततःपार्थःशरैःसंछिद्यखंडशः।पातयामासविहगान्प्रदी
प्तेकृष्णवर्त्मनि।तेशराचितसर्वांगानिनदंतोमहारवान्।ऊर्द्धमुत्पत्यवेगेननिपेतुःखांडवेपुनः॥

आ०प० रावैरभ्याहतानांचसंघशोस्मवनौकसां।।विरावःशुश्रुवेघोरःसमुद्रस्येवमथ्यतः।वह्नेश्चापिप्रदी
३२२ प्तस्यखमुपेत्यमहार्च्चिषः।जनयामासुरुद्वेगंसुमहांतंदिवौकसां।तेनार्च्चिषासुसंतप्तादेवाःसर्षि
पुरोगमाः।ततोजग्मुर्म्महात्मानःसर्व्वएवदिवौकसः।शतक्रतुंसहस्राक्षंदेवेशमसुरार्द्दनं।। ॥
देवाऊचुः।। किंन्विमेमानवाःसर्व्वेदह्यंतेचित्रभानुना।कच्चिन्नसंक्षयःप्राप्तोलोकानाममरे
श्वरः।। वैशं ।।तच्छ्रुत्वावृत्रहातेभ्यःस्वयमेवान्ववेक्ष्यच।खांडवस्यविमोक्षार्थंप्रययौहरिवा
हनः।महतारथवृंदेननानारूपेणवासवः।आकाशंसमवाकीर्य्यप्रववर्षसुरेश्वरः।ततोक्षमा
त्राव्यसृजन्धाराःशतसहस्रशः।चोदितादेवराजेनजलदाःखांडवंप्रति।असंप्राप्तास्तुताधारास्ते
जसाजातवेदसः।खएवसमशुष्यंतनकाश्चित्पावकंगताः।ततोनमुचिहाक्रुद्धोभृशमर्च्चिष्मत ३२२
स्तदा।पुनरेवमहामेघैरंभांसिव्यसृजद्बहु।अर्च्चिर्द्धाराभिसंबद्धंधूमविद्युत्समाकुलं।बभूवतद्व
नंघोरंस्तनयित्नुसमाकुलं इत्यादिपर्व्वणिखांडवदाहे वैशं तस्याथवर्षतोवा
रिपांडवःप्रत्यवारयत्।शरवर्षेणबीभत्सुरुत्तमास्त्राणिदर्शयन्।खांडवंचवनंसर्व्वंपांडवोबहु

भिःश्रैरैःप्राछादयदमेयात्मानीहारेणेवचंद्रमाः।नचस्मकिंचिछक्नोतिभूतंनिश्चरितुंततः।संछाद्य
मानेखेवाणैरस्यतासव्यसाचिना।तक्षकस्तुनतत्रासीन्नागराजोमहावलः।दह्यमानेवनेतस्मिन्
कुरुक्षेत्रंगतोभवत्।अश्वसेनोभवत्तत्रतक्षकस्यसुतोवली।सयत्नमकरोत्तीव्रंमोक्षार्थंजातवे
दसः।नशशाकसनिर्गंतुंनिरुद्धोर्जुनपत्रिभिः।मोक्षयामासतंमातानिगीर्यभुजगात्मजा।त
स्यपूर्वंशिरोग्रस्तंपुछमस्यनिगीर्यते।निगीर्यमाणासाक्रामत्सुतंनागीमुमुक्षया।तस्याःशरेण
तीक्ष्णेनपृथुधारेणपांडवः।शिरश्चिछेदगछंत्यास्तामपश्यछचीपतिः।तंमुमोचयिषुर्वज्रीवात
वर्षेणपांडवं।मोहयामासतत्कालमश्वसेनस्त्वमुच्यत।तांचमायांतदादृष्ट्वाघोरांनागेनवंचितः।द्वि
धात्रिधाचखगतान्प्राणिनःपांडवोछिनत्।सशापतंचसंक्रुद्धोवंचनान्नामनुस्मरन्।देवराजोपितं
दृष्ट्वासंरब्धंसमरेर्जुनं।स्वमस्त्रमसृजत्तीव्रंछादयित्वाखिलंनभः।ततोवायुर्महाघोषःक्षोभयन्सर्व
सागरान्।वियत्स्थोजनयन्मेघान्जलधारासमाकुलान्।ततोशनिमुचोघोरांस्तडित्स्तनितनिःस्व
नान्।तद्विघातार्थमसृजदर्जुनोप्यस्त्रमुत्तमं।वायव्यमभिमंत्र्याथप्रतिपत्तिविशारदः।तेनेंद्राश

निमेघानां वीर्यौजस्तद्विनाशितं। जलधाराश्च ताः शोषं जग्मुर्नेशुश्च विद्युतः। क्षणेन चाभवद्व्योम संप्रशा
आ०प० शांतरजस्तमः। सुखशीतानिलवहं प्रकृतिस्थार्कमंडलं। निष्प्रतीकारहृष्टश्च हुतभुग्विविधाकृतिः।
३२३ सिच्यमानो वसौघैस्तैः प्राणिनां देहनिःसृतैः। प्रजज्वालाथ सोर्चिष्मान्स्वनादैः पूरयन्जगत्। कृष्णाभ्यां
रक्षितं दृष्ट्वा तं च दावमहंकृताः। खमुत्पेतुर्महाराज सुपर्णाद्याः पतत्रिणः। गरुत्मान्वज्रसदृशैः पक्षतुंड
नखैस्तथा। प्रहर्त्तुकामो न्यपतदाकाशात्कृष्णपांडवौ। तथैवोरगसंघाताः पांडवस्य समीपतः। उत्सृजंतो
विषं घोरं निश्चेरुर्ज्वलिताननाः। तांश्चकर्त्त शरैः पार्थः सरोषाग्निसमुक्षितैः। विविशुश्चापि तं दीप्तं देहाभा
वायपावकं। ततोसुराः सगंधर्वाः यक्षराक्षसपन्नगाः। उत्पेतुर्नादमतुलमुत्सृजंतो रणार्थिनः। अयःकण
पचक्राश्मभुशुंड्युद्यतवाहवः। कृष्णपार्थौ जिघांसंतः क्रोधसंमूर्छितौजसः। तेषामभिव्याहरतां शस्त्रवर्षं ३२३
च मुंचतां। प्रममाथोत्तमांगानि वीभत्सुर्निशितैः शरैः। कृष्णश्च सुमहातेजाश्चक्रेणारिविनाशनः। दैत्य
दानवसंघानां चकार कदनं महत्। अथापरे शरैर्विद्धाश्चक्रवेगेरितास्तथा। वेलामिव समासाद्य व्यतिष्ठन्न
मितौजसः। ततः शक्रोतिसंक्रुद्धः त्रिदशानां महेश्वरः। पांडुरं गजमास्थाय तावुभौ समुपाद्रवत्। वेगेना

शनिमादायवज्रमस्त्रंवसोसृजन्।हतावेतावितिप्राहसुरानसुरसूदनः।ततःसमुद्यतंदृष्ट्वादेवेंद्रेणमहाश
निं।जगृहुःसर्वशस्त्राणिस्वानिस्वानिसुरास्तथा।कालदंडंयमोराजनगदांचैवधनेश्वरः।पाशांश्चतत्रवरु
णोविचित्रांचतथाशनिं।स्कंदःशक्तिंसमादायतस्थौमेरुरिवाचलः।औषधीदीप्यमानाश्चजगृहातेश्विना
वपि।जगृहेचधनुर्धातामुशलंचजयस्तथा।पर्वतंचापिजग्राहक्रुद्धस्त्वष्टामहाबलः।अंशस्तुशक्तिंजग्रा
हमृत्युर्देवःपरस्वधं।प्रगृह्यपरिघंघोरंविचचारार्यमापि।मित्रश्चक्षुरपर्यंतंचक्रमादायतस्थिवान्।
पूषाभगश्चसंक्रुद्धःसविताचविशांपते।आत्तकार्मुकनिस्त्रिंशाःकृष्णपार्थौप्रदुद्रुवुः।रुद्राश्चवसवश्चैव
मरुतश्चमहाबलाः।विश्वेदेवास्तथासाध्यादीप्यमानाःस्वतेजसा।एतेचान्येचबहवोदेवास्तौपुरुषोत्तमौ।
कृष्णपार्थौजिघांसंतःप्रतीयुर्विविधायुधाः।तत्राद्भुतान्यदृश्यंतनिमित्तानिमहाहवे।युगांतसमरूपा
णिभूतसंमोहनानिच।तथादृष्ट्वासुसंरब्धंशक्रंदेवैःसहाच्युतौ।अभीतौयुधिदुर्धर्षौतस्थतुःसज्यकार्मु
कौ।आगच्छतस्ततोदेवानुभौयुद्धविशारदौ।व्यताडयेतांसंक्रुद्धौशरैर्वज्रोपमैस्तदा।असकृद्भग्नसंकल्पाः
सुराश्चबहुशःकृताः।भयाद्रणंपरित्यज्यशक्रमेवाभिशिश्रियुः।दृष्ट्वानिवारितान्देवान्माधवेनार्जुनेनच।

आ०प०
३२४

आश्चर्यमगमंस्तत्र मुनयो नभसि स्थिताः। शक्रश्चापि तयोर्वीर्यमुपलभ्य शरूद्रणे। बभूव परमप्रीतो भूय
श्चैतावयोधयत्। ततोश्मवर्षं सुमहद्व्यसृजत्पाकशासनः। भूय एव तदा वीर्यं जिज्ञासुः सव्यसाचिनः। तच्छरैरर्जु
नो वर्षं प्रतिघ्नन्समर्षणः। विफलं क्रियमाणं तत्समवेक्ष्य शतक्रतुः। भूयः संवर्द्धयामास तद्वर्षं पाकशासनः। सो
श्मवर्षं महावेगैरिषुभिः पाकशासनिः। विलयं गमयामास हर्षयन्पितरं तथा। ततस्त्साद्य पाणिभ्यां मंदराच्छि
खरं महत्। सद्रुमं व्यसृजच्छक्रो जिघांसुः पांडुनंदनं। ततोर्जुनो वेगवद्भिर्ज्वलिताग्रैरजिह्मगैः। शरैर्विध्वंसयामा
स गिरेः शृंगं सहस्रधा। गिरेर्विशीर्यमाणस्य तस्य रूपं तदा बभौ। सार्कचंद्रग्रहस्येव नभसः परिशीर्यतः।
तेनाभिपतता दावे शैलेन महता भृशं। शृंगेण निहतास्तत्र प्राणिनः खांडवालयाः   इत्यादि पर्वणि खांड
वदाहे   वैशम्प   तथा शैलनिपातेन भीषिताः खांडवालयाः। दानवा राक्षसा नागास्तरक्ष्वृक्षवनौकसः ३२४
। द्विजाः प्रभिन्नाः शार्दूलाः सिंहाः केसरिणस्तथा। समुद्विग्ना विससृपुस्तथान्या भूतजातयः। तं दावं समुदैक्ष
न्त कृष्णौ चाभ्युद्यतायुधौ। उत्पातनादशब्देन संत्रासित इवास्थिताः। तेवनं प्रसमीक्ष्याथ दह्यमानमनेकधा।
कृष्णमभ्युद्यतास्त्रं च नादं मुमुचुरुल्बणं। तेन नादेन रौद्रेण नादेन च विभावसोः। ररासगमनं कृत्स्नमुत्पात

जलदैरिवाततःकृष्णोमहाबाहुःस्वतेजोभास्करंमहत्।चक्रंव्यसृजदत्युग्रंतेषान्नाशायकेशवः।तेनार्त्ताजात
यःक्षुद्राःसदानवनिशाचराः।निकृत्ताःशतशःसर्व्वानिपेतुरनलंक्षणात्।तत्रादृश्यन्ततेदैत्याःकृष्णचक्रवि
दारिताः।वसारुधिरसंपृक्ताःसंध्यायामिवतोयदाः।पिशाचान्पक्षिणोनागान्पशूंश्चैवसहस्रशः।निघ्नं
श्चरतिवार्ष्णेयःकालवत्तत्रभारत।क्षिप्तंक्षिप्तंपुनश्चक्रंकृष्णस्यामित्रघातिनः।छित्वानेकानिसत्वानिपाणि
मेतिपुनःपुनः।तथातुनिघ्नतस्तस्यपिशाचोरगराक्षसान्।बभूवरूपमत्युग्रंसर्व्वभूतात्मनस्तदा।समेताना
न्तुसर्व्वेषांदानवानांचसर्व्वशः।विजेतानाभवत्कश्चित्कृष्णपांडवयोर्मृधे।तयोर्बलात्परित्रातुंतंचदावंय
दासुराः।नाशक्नुवन्शमयितुंतदाभूवन्पराङ्मुखाः।शतक्रतुस्तुसंप्रेक्ष्यविमुखानमरांस्तथा।बभूवमु
दितोराजन्प्रशंसन्केशवार्जुनौ।निवृत्तेष्वथदेवेषुवागुवाचाशरीरिणी।शतक्रतुंसमाभाष्यमहागंभीर
निस्वना।नतेसखासन्निहितस्तक्षकोभुजगोत्तमः।दाहकालेखांडवस्यकुरुक्षेत्रंगतोह्यसौ।नचशक्यौ
युधाजेतुंकथंचिदपिवासव।वासुदेवार्जुनावेतौनिबोधवचनान्मम।नरनारायणावेतौपूर्व्वदेवौदिवि
श्रुतौ।भवानप्यभिजानातियद्वीर्यौयत्पराक्रमौ।नैतौशक्यौदुराधर्षौविजेतुमजितौयुधि।अपिसर्व्वेषु

श्री०प०
३२५

लोकेषुपुराणाहृषिसत्तमौ।पूजनीयतमावेतावपिसर्वैःसुरेश्वरैः।यक्षराक्षसगंधर्वैर्नरकिन्नरपन्नगैः
तस्मादितःसुरैःसार्द्धंगंतुमर्हसिवासव।दिष्टंवाप्यनुपश्यैतत्खांडवस्यविनाशनं।इतिवाक्यमुपश्रुत्य
तथ्यमित्यमरेश्वरः।क्रोधामर्षौसमुत्सृज्यसप्रतस्थेदिवंतदा।तंप्रस्थितंमहात्मानंसमवेक्ष्यदिवौकसः
।सहिताःसेनयाराजन्ननुजग्मुःपुरंदरं।देवराजंतदायान्तंसहदेवैरवेक्ष्यतु।वासुदेवार्जुनौवीरौसिंहना
दंविनेदतुः।देवराजेगतेराजन्प्रहृष्टौकेशवार्जुनौ।निर्विशंकंवनंवीरौदाहयामासतुस्तदा।समारुतइवा
भ्राणिनाशयित्वार्जुनःसुरान्।व्यधमच्छरसंघातैर्देहिनःखांडवालयान्।नचस्मकिंचिच्छक्नोतिभूतंनिश्च
रितुंततः।संछिद्यमानमिषुभिरस्यतासव्यसाचिना।नाशक्नुवंश्चभूतानिमहांत्यपिरणेऽर्जुनं।निरीक्षितुम
मोघास्त्रंयोद्धुंवापिकुतोरणे।शतंचैकेनविव्याधशतेनैकंचपत्रिणं।व्यसवस्तेपतन्नग्नौसाक्षात्कालहता ३२५
इव।नचालभन्तेशर्म्मरोधःसुविषमेषुच।पितृदेवनिवासेषुसंतापश्चाप्यजायत।भूतसंघाश्चबहवोदी
नाश्चक्रुर्म्महास्वनं।रुरुदुर्वानराश्चैवतथामृगतरक्षवः।तेनशब्देनवित्रेसुर्गंगोदधिचराझषाः।विद्याधर
गणाश्चैवयेचतत्रवनौकसः।नत्वर्जुनंमहाबाहोनापिकृष्णंजनार्दनं।निरीक्षितुंवैशक्नोतिकश्चिद्योद्धुंकु

तःपुनः।एकायनगतायेपिनिष्पेतुस्तत्रकेचनः।राक्षसादानवानागाजघ्नेचक्रेणतान्हरिः।तेनुभिन्नशि
रोदेहाश्चक्रवेगाद्गतासवः।पेतुरन्येमहाकायाःप्रदीप्तेवसुरेतसि।समांसरुधिरौघैश्चवसाभिश्चापित
र्पितः।उपर्य्याकाशगोभूत्वाविधूमःसमपद्यत।दीप्ताक्षोदीप्तजिह्वश्चसंप्रदीप्तमहाननः।दीप्तोर्द्ध्वकेशः
पिंगाक्षःपिबन्प्राणभृतांवसां।तांसकृष्णार्जुनकृतांसुधांप्राप्यहुताशनः।बभूवमुदितस्तृप्तःपरांनि
र्वृतिमागतः।अथासुरंमयंनामतक्षकस्यनिवेशनात्।विप्रद्रवन्तंसहसाददर्शमधुसूदनः।त
मग्निःप्रार्थयामासदिधक्षुर्वातसारथिः।शरीरवान्जटीभूत्वानदन्निववलाहकः।जिघांसुर्वासुदेव
स्तंचक्रमुद्यम्याधिष्ठितः।सचक्रमुद्यतंदृष्ट्वादिधक्षंतंचपावकं।अभिधावार्जुनेत्येवंमयःत्राहीतिचा
ब्रवीत्।तस्यभीतस्वनंश्रुत्वामाभैरितिधनंजयः।प्रत्युवाचमयंपार्थोजीवयन्निवभारत।तन्नभेतव्य
मित्याहमयंपार्थोदयापरः।तंपार्थेनाभयेदत्तेनमुचेर्भ्रातरंमयं।नहन्तुमैच्छद्दाशार्हःपावकोनददाह
च।~~अश्वसेनंमयंचैव~~तस्मिन्वनेदह्यमानेषुअग्निर्नददाहच।अश्वसेनंमयंचैवचतुरःशार्ङ्गकांस्तथा
॥ इत्यादिपर्वणिखांडवदाहे जनमेजय उ किमर्थंशार्ङ्गकानग्निर्न्नददाहतथागते।

 तस्मिन्वने दह्यमाने ब्रह्मन्नग्नेतन्त्र चङ्खमे। अदाहे ह्यश्वसेनस्य दानवस्य मयस्य च। कारणं कीर्त्तितं ब्रह्मन्नृशा
 र्ङ्गकानां न कीर्त्तितं। तदेतदद्भुतं ब्रह्मन्नृशार्ङ्गकानाम नामयं। कीर्त्तयस्वाग्निसम्मर्द्दे कथं ते न विनाशिताः
॥ वैशं ॥ यदर्थं शार्ङ्गकानग्निर्न्न ददाह तथागते। तत्ते सर्व्वं प्रवक्ष्यामि यथाभूतमरिंदम। धर्मज्ञानां
मुख्यतमस्तपस्वी संशितव्रतः। आसीन्महर्षिः श्रुतवान्मंदपाल इति श्रुतः। स मार्गमाश्रितो राजन्नृषी
णामूर्द्ध्वरेतसां। स्वाध्यायवान्धर्म्मरतस्तपस्वी विजितेंद्रियः। सगत्वा तपसः पारं देहमुत्सृज्य भारत। जगा
म पितृलोकाय न लेभे तत्र तत्फलं। स लोकानफलान्दृष्ट्वा तपसा निर्ज्जितानपि। पप्रच्छ धर्म्मराजस्य स
मीपस्थान्दिवौकसः ॥ मंदपाल उ ॥ किमर्थमावृता लोका ममैते तपसार्ज्जिताः। किं मया न कृतं तत
त्र यस्यैतत्कर्म्मणः फलं। तत्राहं तत्करिष्यामि यदर्थमिदमावृतं। फलमेतस्य तपसः कथयध्वं दिवौक
सः ॥ देवा ऊचुः ॥ ऋणिनो मानवा ब्रह्मन्जायन्ते येन तच्छृणु। क्रियाभिर्ब्रह्मचर्येण तपसा च न संशयः
। तदपाक्रियते सर्व्वं यज्ञेन तपसा श्रुतैः। तपस्वी यज्ञकृच्चासि न च ते विद्यते प्रजा। त इमे प्रसवस्यार्थे तव
लोकाः समावृताः। प्रजायस्व ततो लोकानुपभोक्ष्यसि पुष्कलान्। पुन्नाम्नो नरकात्पुत्रस्त्रायते पितरं श्रु

तिः।तस्मादपत्यसंतानेयतस्वब्रह्मसत्तम वैशं नच्छ्रुत्वामंदपालस्तुवचस्तेषांदिवौकसां।क्व
नुशीघ्रमपत्यंस्याद्बहुलंचेत्यचिंतयत्।सचिंतयन्नभ्यगच्छत्सुबहुप्रसवान्खगान्।शार्ङ्गिकांशार्ङ्गः
कोभूत्वाजरितांसमुपेयिवान्।तस्यांपुत्रानजनयच्चतुरोब्रह्मवादिनः।तानपास्यसतत्रैवजगामलपि
तांप्रति।बालान्सुतानंडगतान्सहमात्रामुनिर्वने।तस्मिन्गतेमहाभागेलपितांप्रतिभारत।अपत्यस्नेह
संयुक्ताजरिताबह्वचिंतयत्।तेनत्यक्तानसंत्याज्यानृषीनंडगतान्वने।नजहौपुत्रशोकार्ताजरिताखांड
वेसुतान्।बभारचैतान्संजातान्स्ववृत्त्यास्नेहविक्लवा।ततोग्निंखांडवंदग्धुमायांतंदृष्टवानृषिः।मंदपा
लश्चरंस्तस्मिन्वनेलपितयासह।तंसंकल्पंविदित्वाग्नेर्ज्ञात्वापुत्रांश्चबालकान्।सोभितुष्टावविप्रर्षि
र्ब्राह्मणोजातवेदसं।पुत्रान्प्रतिवदन्भीतोलोकपालंमहौजसं मंदपालउ त्वमग्नेसर्वलोका
नांमुखंत्वमसिहव्यवाट्।त्वमंतःसर्वभूतानांगूढश्चरसिपावक।त्वामेकमाहुःकवयस्त्वामाहुस्त्रिविधं
पुनः।त्वामष्टधाकल्पयित्वायज्ञवाहमकल्पयन्।त्वयाविश्वमिदंसृष्टंवदंतिपरमर्षयः।त्वदृतेहिज
गत्कृत्स्नंसद्योनश्येद्धुताशनः।तुभ्यंकृत्वानमोविप्राःस्वकर्मविजितांगतिं।गच्छंतिसहपत्नीभिःसुतै

आ०प० रपि चत्राश्रितौ॥ त्वामग्ने जलदानाकुःखेविषक्तान्सविद्युतः। दहंति सर्व्वभूतानि त्वत्तो निष्क्रम्य हेतयः। जात
३२७ वेदस्त्वयैवेदं विश्वं सृष्टं महाद्युते। त्वत्रैव कर्मविहितं भूतं सर्व्वं चराचरं। त्वयापो विहिताः पूर्व्वं त्वयि सर्व्वमिदं ज
गत्। त्वयि हव्यं च कव्यं च यथावत्संप्रतिष्ठितं। त्वमेव दहनो देव त्वं धाता त्वं बृहस्पतिः। त्वमश्विनौ यमो मित्रः
सोमस्त्वमसि चानिलः॥ वैशं ॥ एवं स्तुतस्तदा तेन मंदपालेन पावकः। तुतोष तस्य नृपते मुनेरमित
तेजसः। उवाच चैनं प्रीतात्मा किमिष्टं करवाणि ते। तमब्रवीन्मंदपालः प्रांजलिर्हव्यवाहनं। प्रदहन्खांड
वं दावममम पुत्रान्विसर्ज्जय। तथेति तत्प्रतिश्रुत्य भगवान्हव्यवाहनः। खांडवे तेन कालेन प्रजज्वाल दि
लदिधिक्षया॥ इत्यादिपर्व्वणि खांडवदाहे वैशम् ततः प्रज्वलिते वह्नौ शार्ङ्गकास्ते सुदुः
खिताः। व्यथिताः परमोद्विग्नाः नाधिजग्मुः परायणं। निशाम्य पुत्रकान्बालान्माता तेषां तपस्विनी। जरिता ३२७
दुःखशोकार्त्ता विललाप सुदुःखिता जरितोवाच अयमग्निर्दहन्कक्षमित आयाति भीषणः। जग
त्संदीपयन्भीमो मम दुःखविवर्द्धनः। इमे च मां कर्षयंति शिशवो मंदचेतसः। अवर्हाश्चरणैर्हीनाः पूर्व्वेषां
नः परायणाः। त्रासयंश्चायमायाति लेलिहानो महीरुहान्। अजातपक्षाश्च सुता न शक्ताः शरणे ममाश्र

दायचनशक्नोमिपुत्रांस्त्वरितुमात्मना। नचत्यक्तुमहंशक्ता हृदयंदूयतीवमे। कंनुजह्यामहंपुत्रंकमादाय
व्रजाम्यहं। किंनुमेस्यात्कृतंकृत्वामन्यतपुत्रकाः। चिन्तयानाविमोक्षंवोनाधिगच्छामिकिंचन। छादयि
ष्यामिवोगात्रैःकरिष्येमरणंसह। जरितारौकुलंह्येतज्ज्येष्ठत्वेनप्रतिष्ठितं। सारिसृक्वःप्रजायेतपितॄणां
कुलवर्द्धनः। स्तंबमित्रःस्तपःकुर्यात्द्रोणोब्रह्मविदांवरः। इत्येवमुक्त्वाप्रययौपितावोनिर्घृणःपुरा। कमु
पादायशक्येयंगंतुंकष्टापदुत्तमा। किंनुकृत्वाकृतंकार्यंभवेदितिचविह्वला। नापश्यत्स्वधियामोक्षंस्व
सुतानांतदानलात्॥ वैशं ॥ एवंब्रुवाणांशार्ङ्गास्तेप्रत्यूचुरचमातरं। स्नेहमुत्सृज्यमातस्त्वंपतयत्र
नहव्यवाट्। अस्मासुहिविनष्टेषुभवितारःसुतास्तव। त्वयिमातर्विनष्टायांननःस्यात्कुलसन्ततिः। अन्ववे
क्ष्यैतदुभयंक्षमंस्याद्यत्कुलस्यनः। तद्वैकर्त्तुंपरःकालोमातरेषभवेत्तव। मात्वंसर्व्वविनाशायस्नेहंकार्षीःसु
तेषुनः। नहीदंकर्ममोघंस्याल्लोककामस्यनःपितुः॥ जरितोवाच ॥ इदमाखोर्बिलंभूमौवृक्षस्यास्य
समीपतः। तदाविशध्वंत्वरितावह्नेरत्रनवोभयं। ततोहंपांशुनाछिद्रमपिधास्यामिपुत्रकाः। एवंप्रतिकृतं
मन्येज्वलतःकृष्णवर्त्मनः। ततएष्याम्यतीतेग्नौविहर्तुंपांशुसंचयं। रोचतामेषवोवादोमोक्षार्थंचकृताश्र

आ०प० नान्॥ शार्ङ्गका ऊचुः ॥ अवर्हान्मांससंभूतान्नः क्रव्यादाखुर्विनाशयेत्। पश्यमाना भयमिदं प्रवेष्टुं नात्र
३२८ शक्नुमः। कथमग्निर्न्नो न धक्ष्येत्कथमाखुर्न्न नाशयेत्। कथं न स्यात्पिता मोघः कथं माता ध्रियेत नः। विलआ
खोर्विनाशः स्यादग्नेराकाशचारिणः। अन्ववेक्ष्यैतदुभयं श्रेयान्दाहो न भक्षणं। गर्हितं मरणं नः स्यादा
खुना भक्षिते विले। दिष्टः परित्यागः शरीरस्य हुताशनात्॥ इत्यादिपर्वणि खांडवदाहे
जरितोवाच अस्माद्विलान्निष्पतितं माखुं श्येनो जहार तं। क्षुद्रं पद्भ्यां गृहीत्वा च याता नात्र भयं हि वः॥
शार्ङ्गका ऊचुः न हृतं तं वयं विद्मः श्येनेनाखुं कथंचन। अन्येपि भवितारोत्र तेभ्योपि भयमेव नः। संश
योवह्निरागच्छेद्दृष्टं वायोर्निवर्तनं। मृत्युर्न्नो विलवासिभ्यो विलेस्यान्नात्र संशयः। निःसंशयात्संशयितो
मृत्युर्मातर्विशिष्यते। खे चर त्वं यथान्यायं पुत्रानाप्स्यसि शोभनान्॥ जरितोवाच अहं वेगेन तंया ३२८
तमद्राक्षं पततां वरं। विलादाखुं समादाय श्येनं पुत्रा महाबलं। तं पतन्तं महावेगात्त्वरिताहं सृतोन्वगां। आ
शिषोस्य प्रयुंजाना हरतो मूषिकं विलात्। यो नो द्वेष्टारमादाय श्येनराज प्रधावसि। भव त्वं दिवमास्थाय
निरमित्रो हिरण्मयः। स यदा भक्षितस्तेन श्येनेनाखुः पतत्रिणा। तदाहं तमनुज्ञाप्य प्रत्युपायां पुनर्गृहं। प्र

विशाध्वंविलंपुत्राविस्रब्धंनात्रवोभयं।श्येनेनममपश्यन्त्याहृतआखुर्म्महात्मना शार्ङ्गकाऊचुः ॥
नविद्महेहृतंमातःश्येनेनाखुंकथंचन।अविज्ञायनशक्यामःप्रवेष्टुंविवरंभुवः जरितोवाच अ
हंतमभिजानामिहृतंश्येनेनमूषिकं।नास्तिवोत्रभयंपुत्राःक्रियतांवचनंमम शार्ङ्गकाऊचुः नत्वं
मिथ्योपचारेणमोक्षयेथाभयाद्धिनः।समाकुलेषुज्ञानेषुनबुद्धिकृतमेवतत्।नचोपकृतमस्माभिर्न्नचा
स्मान्वेत्थयेवयं।पीड्यमानाविभर्ष्यस्मान्कासतीकेवयंतव।तरुणीदर्शनीयासिसमर्थाभर्तुरेषणे।अनुग
च्छपतिंमातःपुत्रानाप्स्यसिशोभनान्।वयमग्निंसमाविश्यलोकानाप्स्यामशोभनान्।यदास्मान्नदहेदग्नि
रायास्त्वंपुनरेवनः वैशं एवमुक्ताततःशार्ङ्गीपुत्रानुत्सृज्यखांडवे।जगामत्वरितादेशंक्षेममग्नेरना
मयं।ततस्तीक्ष्णार्च्चिरभ्यागात्त्वरितोहव्यवाहनः।यत्रशार्ङ्गावभूवुस्तेमंदपालस्यपुत्रकाः।ततस्तेज्वलितंदृ
ष्ट्वाज्वलनंतेविहंगमाः।जरितारिस्ततोवाचंश्रावयामासपावकं इत्यादिपर्व्वणिशार्ङ्गोपाख्याने
जरितारिरु पुरतःकृच्छ्रकालस्यधीमान्जागर्त्तिपूरुषः।सकृच्छ्रकालंसंप्राप्यव्यथान्नैवैतिकर्हिचित्।य
स्तुकृच्छ्रमनुप्राप्तंविचेतानावबुध्यते।सकृच्छ्रकालेव्यथितोनश्रेयोविंदतेमहत् सारिसृक्कउवाच ॥

धीरस्त्वमसिमेधावीप्राणकृछ्रमिदंचनः।प्राज्ञःशूरोवहूनांहिभवत्येकोनसंशयः॥ स्तंवमित्रउ ज्येष्ठ
स्तातोभवतिवैज्येष्ठोमुंचतिकृछ्रतः।ज्येष्ठश्चेन्नप्रजानातिकनीयान्किंकरिष्यति॥ द्रोणउ हिरण्यरेता
स्त्वरितोज्वलन्नायातिनःक्षयं।सप्तजिह्वाननःक्रूरोलेलिहानोविसर्पति वैशं एवंसंभाष्यतेन्योन्यंमं
दपालस्यपुत्रकाः।तुष्टुवुःप्रयताभूत्वायथाग्निंशृणुपार्थिव जरितारिरु आत्मासिवायोर्ज्वलन
शरीरमसिवीरुधां।योनिरापश्चतेशुक्रयोनिस्त्वमसिचांभसः।ऊर्ध्वंचाधश्चसर्पंतिपृष्ठतःपार्श्वतस्तथा।अ
र्चिषस्तेमहावीर्यरश्मयःसवितुर्यथा॥ सरिसृक्कउ ॥मातापृनष्टापितरंनविद्मःपक्षाजातानैवनो
धूमकेतो।ननस्त्राताविद्यतेवैत्वदन्यस्तस्मादस्मांस्त्राहिवालांस्त्वमग्ने।यदग्नेतेशिवंरूपंयेचतेसप्तहेतयः
तेननःपरिपाहित्वमार्त्तान्नःशरणैषिणः।त्वमेवैकस्तपसेजातवेदोनान्यस्तप्ताविद्यतेगोषुदेवा।ऋषी ३२९
नस्मान्वालकान्पालयस्वपरेणास्मान्प्रेहिवैहव्यवाह स्तंवमित्रउ सर्वमग्नेत्वमेवैकस्त्वयिसर्वमि
दंजगत्।त्वंधारयसिभूतानिभुवनंत्वंविभर्षिच।त्वमग्निर्हव्यवाहस्त्वंत्वमेवपरमंहविः।मनीषिणस्त्वांजा
नन्तिवहुधाचैकधापिच।सृष्ट्वालोकांस्त्रीनिमान्हव्यवाहकालेप्राप्तेपचसिपुनःसमिद्धः।त्वंसर्वस्यभु

भुवनस्यप्रसूतिस्त्वमेवाग्नेभवसिपुनःप्रतिष्ठा — द्रोणउ — त्वमन्नंप्राणिभिर्भुक्तमन्तर्भूतोजगत्पते।नित्यं
प्रवृद्धःपचसित्वयिसर्वंप्रतिष्ठितं।सूर्योभूत्वारश्मिभिर्जातवेदोभूमेरंभोभूमिजातान्रसांश्च।विश्वानादाय
पुनरुत्सर्गकालेदृष्ट्वासृष्ट्वाभावयसीहशुक्र॥त्वत्तएताःपुनःशुक्रवीरुधोहरितच्छदाः।जायन्तेपुष्करिण्य
श्चसमुद्रश्चमहोदधिः।इदंवैसद्मतिग्मांशोर्वरुणस्यपरायणं।शिवस्त्राताभवास्माकंमास्मानद्यविनाश
य।पिङ्गाक्षलोहितग्रीवकृष्णवर्त्मन्हुताशनः।परेणप्रैहिमुंचास्मान्सागरस्यगृहानिव — वैशम् ॥
एवमुक्तोजातवेदाद्रोणेनब्रह्मवादिना।द्रोणमाहप्रतीतात्मामंदपालप्रतिज्ञया — अग्निरु — ऋषिर्द्रो
णस्त्वमसिवैब्रह्मैतद्व्याहृतंत्वया।ईप्सितंतेकरिष्यामिनचतेविद्यतेभयं।मंदपालेनवैयूयंममपूर्वंनि
वेदिताः।वर्जयेःपुत्रकान्मह्यंदहन्दावमितिस्मह।तस्यतद्वचनंद्रोणत्वयायच्चेहभाषितं।उभयंमेगरी
यस्तुब्रूहिकिंकरवाणिते।भृशंप्रीतोस्मिभद्रंतेब्रह्मन्स्तोत्रेणसत्तम — द्रोणउ — इमेमार्जारकाःशुक्र
नित्यमुद्वेजयन्तिनः।एतान्कुरुष्वदग्धांस्त्वंहुताशनसबांधवान्।तथातत्कृतवानग्निरभ्यनुज्ञायशार्ङ्ग
कान्।ददाहखांडवंदावंसमिद्धोजनमेजय — इत्यादिपर्वणिखांडवदाहेशार्ङ्गोपाख्याने २२५

आ०प० २३० वैशं मंदपालोपिकौरव्यचिंतयामासपुत्रकान्।उक्त्वापिचसतिग्मांशुंनैवशर्म्माधिगच्छति।सतप्यमा
नःपुत्रार्थेलपितामिदमब्रवीत्।कथंत्वशक्ताःशरणेलपितेममपुत्रकाः।वर्द्धमानेहुतवहेवातेचाशुप्र
वायति।असमर्थाविमोक्षायभविष्यन्तिममात्मजाः।कथंतुशक्तात्राणायमातातेषांतपस्विनी।भविष्य
तिहिशोकार्त्तापुत्रत्राणमपश्यती।कथमुड्डीयनेशक्तापतनेचममात्मजान्।सन्तप्यमानाबहुधावास
मानाप्रधावति।जरितारिःकथंपुत्रःसारिसृक्कःकथंचमे।स्तंबमित्रःकथंद्रोणःकथंसाचतपस्विनी।ला
लप्यमानंतमृषिंमंदपालंतथावने।लपिताप्रत्युवाचेदंसासूयमिवभारत।नतेपुत्रेष्ववेक्षास्तियानृषी
नुक्तवानसि।तेजस्विनोवीर्यवंतोनतेषांज्वलनाद्भयं।त्वयाग्नौतेपरीताश्चस्वयंहिममसन्निधौ।प्रतिश्रुतं
तथाचेतिज्वलनेनमहात्मना।लोकपालोनतांवाचमुक्त्वामिथ्याकरिष्यति।समर्थंबंधुकृत्येनतेनतेस्वस्थ २३०
मानसं।तामेवतुममामित्रांचिंतयन्परितप्यते।ध्रुवंमयिनतेस्नेहोयथातस्यांपुराभवत्।नहिपक्षवता
न्याय्यंनिःस्नेहेनसुहृज्जने।पीड्यमानउपद्रष्टुंशक्तेनात्माकथंचन।गच्छत्वंजरितामेवयदर्थंपरितप्य
से।चरिष्याम्यहमप्येकायथाकुपुरुषाश्रिता मंदपालउ नाहमेवंचरेलोकेयथात्वमभिम

न्यसे।अपत्यहेतोर्विचरेतच्चकृच्छ्रगतंममाभूतंहित्वाचरिष्यामिलपितेयंसुमंदधीः।अवमन्येततंलोको
यथेच्छसितथाकुरु।एषहिप्रज्वलन्नग्निर्ल्लेलिहानोमहीरुहान्।आविग्नेद्धदिसंतापंजनयत्यशिवंतथा॥
वैशं तस्माद्देशादतिक्रान्तेज्वलनेजरितापुनः।जगामपुत्रकानेवजरितापुत्रगृद्धिनी।सातान्कुशलि
नःसर्व्वान्विमुक्तान्जातवेदसः।रोरूयमाणान्ददृशेवनेपुत्रान्निरामयान्।अश्रूणिमुमुचेतेषांदर्शनात्सा
पुनःपुनः।एकैकशपेनयत्पुत्रेक्रोशमानान्वपद्यत।ततोभ्यगच्छत्सहसामंदपालोपिभारत।अथतेसर्व्वएवै
नंनाभ्यनंदन्तदासुताः।लालप्यमानमेकैकंजरिताचपुनःपुनः।नचैवोचुस्तदाकिंचित्तमृषिंसाध्वसाधु
वा मंदपालउ ज्येष्ठःसुतस्तेकतमःकतमस्तस्यचानुजः।मध्यमःकतमश्चैवकनीयान्कतम
श्चते।एवंब्रुवन्तंदुःखार्त्तंकिम्मांनप्रतिभाषसे।कृतवानपिहिसागंनैवशान्तिमितोलभे जरितोवाच
किंतुज्येष्ठेनतेकार्य्यंकिमनंतरजेनते।किंवामध्यमजातेनकिंकनिष्ठेनवापुनः।यांत्वंमांसर्व्वतोहीनामुत्सृ
ज्यासिगतःपुरा।तामेवलपितांगच्छतरुणीचारुहासिनीं मंदपालउ नस्त्रीणांविद्यतेकिंचिदन्य
त्पुरुषान्तरात्।सापत्नकमृतेलोकेनान्यदर्थविनाशनं।वैराग्निदीपनंचैवभृशमुद्वेगकारिच।सुव्रताचा

आ०प० पि कल्याणी सर्व्वभूतेषु विश्रुता। अरुंधती महात्मानं वशिष्ठं पर्य्यशंकत। विशुद्धभावमत्यन्तं सदा प्रियहिते
३३१ रतं। सप्तर्षिमध्यगं वीरमवमेने च तं मुनिं। अपध्यानेन सा तेन धूमारुणसमप्रभा। लक्ष्यालक्ष्या नाभिरूपा
निमित्तमिव पश्यति। अपत्यहेतोः संप्राप्तं तथा त्वमपि मामिह। इष्टमेवं गते हि त्वं सा तथैवाद्य वर्त्तसे। न
हि भार्येति विश्वासः कार्य्यः पुंसा कथंचन। न हि कार्य्यमनुध्याति नारी पुत्रवती सती॥ ॥वैशंपा॥ ॥
ततस्ते सर्व्व एवैनं पुत्राः सम्यगुपासते। स च तानात्मजान्सर्व्वानाश्वासयितुमुद्यतः इत्यादि पर्व्व
णि खाण्डवदाहे शार्ङ्गोपाख्याने मंदपाल उ युष्माकमपवर्गार्थं विज्ञप्तो ज्वलनो मया। अ
ग्निना च तथेत्येवं प्रतिज्ञातं महात्मना। अग्नेर्वचनमाज्ञाय मातुर्धर्म्मज्ञतां वचः। भवतां च परं वीर्य्यं पूर्व्वं ना
हमिहागतः। न संतापो हि वः कार्य्यः पुत्रका हृदि मां प्रति। ऋषीन्वेद हुताशोपि ब्रह्म तद्विदितं च वः॥ ३३१
वैशं एवमाश्वासितान्पुत्रान्भार्यां मा दाय स द्विजः। मंदपालस्ततो देशादन्यं देशं जगाम ह। भगवा
नपि तिग्मांशुः समिद्धः खांडवं ततः। ददाह सह कृष्णाभ्यां जनयन्जगतो हितं। वसामेदोवहाः कुल्या
स्तत्र पीत्वा च पावकः। जगाम परमां तृप्तिं दर्शयामास चार्जुनं। ततोंऽतरिक्षाद्भगवानवतीर्य्य

पुरंदरः।मरुद्गणैर्वृतःपार्थंकेशवंचेदमब्रवीत्।कृतंयुवाभ्यांकर्मेदममरैरपिदुष्करं।वरंवृणीतंतुष्टो
स्मिदुर्लभंपुरुषेष्विह वैशं पार्थस्तुवरयामासशक्रादस्त्राणिसर्वशः।अहंतुतस्वशक्तिंकर्तुं क्रा२
कालंचकेमहाद्युतिः।यदाप्रसन्नोभगवान्महादेवोभविष्यति।तदातुभ्यंप्रदास्यामिपांडवास्त्राणिस
र्वशः।अहमेवचतंकालंवेत्स्यामिकुरुनंदन।तपसामहतावापिदास्यामिभवतोप्यहं।आग्नेयानि
चसर्वाणिवायव्यानिचसर्वशः।मदीयानिचसर्वाणिग्रहीष्यसिधनंजय।वासुदेवोपिजग्राहप्रीतिं
पार्थेनशाश्वतीं।ददौसुरपतिश्चैववरंकृष्णायधीमते।एवंदत्वावरंताभ्यांसहदेवैर्मरुत्पतिः।हु
ताशनमनुज्ञाप्यजगामत्रिदिवंप्रभुः।पावकश्चतदादावंदग्ध्वासमृगपक्षिणं।अहानिपंचचैकंचवि
रराममुतर्पितः।जग्ध्वामांसानिपीत्वाचमेदांसिरुधिराणिच।युक्तःपरमयाप्रीत्यातावुवाचाच्युता
र्जुनौ।युवाभ्यांपुरुषाग्र्याभ्यांतर्पितोस्मियथासुखं।अनुजानामिवांवीरौचरतंयत्रवांछितं।एवंतौ
समनुज्ञातौपावकेनमहात्मना।अर्जुनोवासुदेवश्चदानवश्चमयस्तथा।परिक्रम्यततःसर्वेत्रयोपि
पुरुषर्षभाः।रमणीयेनदीकूलेसहिताःसमुपाविशत् इतिश्रीमहाभारतेशतसाहस्र्यांसं

आ० प० हितायां वैयासिक्यां आदिपर्वणि खाण्डवदाहः समाप्तः शुभमस्तु यश्चेदं श्रावयेद्वि
३३२ द्वान् ये चेदं शृणुयुर्नराः । सर्वपापविनिर्मुक्ताः कामान्प्राप्स्यंति शाश्वतान् । गोभूहिरण्यवस्त्रैश्चान्नै
श्च विविधैस्तथा । पूजयेद्वाचकं भक्त्या कृष्णो भवति पूजितः । यः श्रुत्वा आदिपर्वैतद्वाचकं यस्तु पू
जयेत् । स शत्रून्क्षपते ह्निवपार्थः सर्वकुरून्यथा । ब्रह्महत्यादिकं पापं नश्यते शृण्वतस्तथा । सा
क्षाद्विष्णुमिमं तेन दृष्टा पूजितमो भवेत् ॥ ॥ इत्यादिपर्वः समाप्तः श्रीविक्रमादित्य
संवत् १७४६ ज्येष्ठवदि अष्टम्यां गुरुवासरे ॥ ॥ लिखितमिदं पुस्तकं उपाध्याय इन्द्रशर्मणः
श्रीवागटनिवासिनः लेखकपाठकयोः शुभं भूयात् यादृशं पुस्तकं दृष्ट्वा तादृशं लि
खितं मया । यदि शुद्धमशुद्धं वा मम दोषो न दीयते तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधना ३३२
त् । मूर्खहस्ते न दातव्यं एवं वदति पुस्तकम् ॥ ॥ श्रीगोपालो जयति कृष्णाय नमः ॥

1622.49
1307.37
3/5.12